दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् भाद्रपदकृष्णषष्ठी
भाद्रपद 17 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-13 ■ वर्ष-5 ■ अङ्क-314 | 1 | सितम्बर 03, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 एयर्-मार्शल् जीतेन्द्र-मिश्रः अयोध्यायां श्री रामजन्म-भूमिक्षेत्र-न्यासस्य प्रथम-सी.ई.ओ. रूपेण नियुक्तः

4 श्रीकृष्णस्य आदर्शानुसरणेनैव समृद्धबिहारस्य स्वप्नं साकारं भविष्यति – सम्राट् चौधरी

9 कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्व-विद्यालयस्य सर्वदर्शनविभागेन १०८-व्याख्यानमालायाः एकविंशतितमं व्याख्यानं सम्पन्नम्

## विश्वबैङ्क-प्रमुखेण अजय-बङ्गा इत्यमुना भारतस्य आर्थिक-वृद्धिः प्रशंसिता



केन्द्रीय-वित्तमन्त्री निर्मला सीतारमण अमेरिकायाः ऐशविल्-नगरे जी-20 वित्तमन्त्रिणां केन्द्रीय-बैङ्क-प्रशासकानां च उपवेशनावधौ विश्वबैङ्कस्य अध्यक्षेण अजय-बङ्गा इत्यमुना सह मेलनम् अकरोत्। उपवेशनेऽस्मिन् उभौ नेतारौ भारत-विश्वबैङ्क-समूहयोः सहभागितां अधिकं सुदृढयितुं चर्चा विहितवन्तौ। मन्त्रणायां मूलभूतावसंरचनायै ऋण-संवर्धनार्थं क्षेत्राधारित-कार्यक्रमीय-दृष्टिकोणस्य अपि समीक्षा कृता । श्रीमती सीतारमण भारते वैश्विक अङ्कीय-सार्वजनिक-अवसंरचना-ज्ञान-केन्द्रस्य स्थापना-विषये विश्वबैङ्क-समूहेन सह भारतस्य सहयोगं प्रतिपादितवती, यस्मिन् कृषि-सहितेषु क्षेत्रेषु प्रौद्योगिक्याः सदुपयोगस्य अवसरान्वेषणम् अन्तर्भूतमस्ति। अपरत्, एकस्मिन् साक्षात्कारे विश्वबैङ्क-अध्यक्षः अजय-बङ्गा प्रतिपादितवान् यत् भारतस्य समीपे स्वकीयात् सप्ततः अष्ट-प्रतिशतन्मितात् वर्तमान-विकास-मार्गात् अपि अधिकं द्रुत-गत्या प्रवर्धितुं सामर्थ्यं वर्तते। बङ्गा-महोदयः जागतिक-ऊर्जा-विषादस्य, व्यापारिक-अनिश्चिततायाः, एल् नीनो इत्यस्य प्रभावस्य सत्त्वादपि भारतस्य अद्यतनम् आर्थिक-प्रदर्शनं सुदृढं वर्तते इति वर्णितवान्।




### प्रधानमन्त्री नरेन्द्रमोदी नवदेहल्यां जलशक्ति-मन्त्रालयस्य विभागीय-सम्मेलनस्य समापन-सत्रं सम्बोधितवान्

प्रधानमन्त्री नरेन्द्रमोदी नवदेहल्यां जलशक्ति-मन्त्रालयस्य विभागीय-सम्मेलनस्य समापन-सत्रं सम्बोधितवान्। द्विदिवसीय विभागीय-शिखरसम्मेलनं प्रथम-विभागीय-शिखरसम्मेलनम् अस्ति, यस्य परिकल्पना प्रधानमन्त्रिणः टीम-इण्डिया इत्यस्य भावं सुदृढं कर्तुं सहकारी-सङ्घवादम् सुदृढं कर्तुं च कल्पिता अस्ति। शिखरसम्मेलनं केन्द्र-राज्ययोः मध्ये महत्त्वपूर्ण-क्षेत्रीय-प्राथमिकतानां विषये चर्चा कर्तुं, कालबद्ध-कार्ययोजनानां विकासाय च योजयति। जल-आधारभूत संरचनानां परियोजनानां समयोचित-कार्यान्वयनम्, जल-पञ्चायत्-जनसहभगिता-कैच् द रेन्, पेयजल स्रोत-सुस्थिरता, जल-जीवन-मिशन् 2.0 इत्यादीनां चतुर्णां प्रमुख-क्षेत्राणां विषये सम्मेलनस्य केन्द्रबिन्दुः अस्ति।



### बेल्जियम्-देशस्य प्रधानमन्त्री बार्ट् डी वेवर् इत्येषः त्रिदिवसीयायां भारतयात्रायां वर्त्तते

बेल्जियम्-देशस्य प्रधानमन्त्री बार्ट् डी वेवर् इत्येषः त्रिदिवसीयायां भारतयात्रायां भविष्यति। भ्रमणावधौ सः प्रधानमन्त्रिणा नरेन्द्रमोदिना सह द्वैपाक्षिकसम्बन्धानां समग्रविषयेषु अपि च परस्परहितानां क्षेत्रीय-वैश्विक विषयाणां विषयेषु च चर्चा करिष्यति। प्रधानमन्त्री डी वेवर् इत्येषः, भारत-यूरोपीयसङ्घ-मुक्तव्यापारसमन्वयस्य व्यावसायिक-कार्यक्रमे मुख्य भाषणम् अपि प्रदास्यति। सः मुम्बई-नगरम् अपि गमिष्यति, यत्र सः वज्रस्य, नौकाश्रयस्य, रसद इत्यस्य च क्षेत्रैः सह विविधैः सहभागिभिः सह वार्ता करिष्यति। विदेशमन्त्रालयः अवदत् यत् इयं यात्रा भारत-बेल्जियम्-सहभागित्वम् इतोऽपि सुदृढं कर्तुं अवसरं प्रदास्यति ।

## अद्यतनीयं सुभाषितम्

**दिव्यम् आम्ररसं पीत्वा गर्वं नायाति कोकिलः।**
**पीत्वा कर्दमपानीयं भेको टरटरायते।।**

सरलार्थः- अमृत तुल्य आम के रस को पीकर भी एक कोयल गर्व नहीं करती है परन्तु गन्दगी और कीचड़ से भरे जल को पीकर भी एक मेंढक लगातार टरटराता रहता है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

## आपदग्रस्त-नेपाल-देशाय साहाय्य-सामग्रीमादाय प्रस्थितं भारतस्य पञ्चमं विमानम्

## मृतानां सङ्ख्या प्रायः एकादशशतं सञ्जाता

नेपाल-देशस्य वर्तमान-उद्धार-साहाय्य-प्रयासेषु भारतं सर्वविध-साहाय्यं प्रददाति। साहाय्य-उद्धार-सामग्रीं वहमानं पञ्चमं भारतीयविमानं नेपालदेशं प्रति प्रस्थितः अस्ति। विदेशमन्त्री डा. एस्. जयशङ्करः अकथयत् यत् विमाने एकादश सदस्यानां उद्धारदलं पञ्च-दशांशोत्तर-पञ्च-टन्मितम् आवश्यक औषधैः सह विशेषोपकरणैः युक्तम् अस्ति। अत्रान्तरे, एकोनविंशति सदस्यात्मकं भारतीय-फोरेन्सिक्-दलं नेपालदेशे सद्यः एव आकस्मिकजलाप्लावनेन प्रभावितानां जनानां परिचये साहाय्यं कर्तुं फोरेन्सिक्-विशेषज्ञैः सह डी. एन्. ए. प्रारुपाणां विश्लेषणं प्रारभत्। नेपालदेशे विनाशकारि-जलाप्लावनेन मृतकानां सङ्ख्या प्रायः एकादशशत-परिमिता अभवत्। नेपालस्य राष्ट्रिय-आपत्-सङ्कट-न्यूनीकरण-प्रबन्धन-प्राधिकरणस्य अनुसारं, गतसप्ताहे प्राणघातकजलाप्लावनेन प्रवहिताः चतुर्दशाधिकैकशतोत्तर-एकसहस्रं यावत् शवाः एतावता संप्राप्ताः। दक्षिण-चितवन्-मण्डले सर्वाधिकाः शवाः प्राप्ताः आसन्, तदनन्तरं नवलपरासी-पूर्वम् आसीत्। अधिकारिणः अवदन् यत् अद्यावधि पञ्चनवतिः शवाः अभिज्ञाताः सन्ति, तेषां सम्बन्धिभ्यश्च समर्पिताः सन्ति।

## एयर-मार्शल् जीतेन्द्र-मिश्रः अयोध्यायां श्री रामजन्म-भूमिक्षेत्र-न्यासस्य प्रथम-सी.ई.ओ. रूपेण नियुक्तः



उत्तरप्रदेशे, वेस्टन्-एयर्-कमाण्ड् इत्यस्य पूर्वसेनापतिः, सेवानिवृत्तः एयर्-मार्शल् जीतेन्द्र-मिश्रः अयोध्यायां श्री रामजन्मभूमिक्षेत्र-न्यासस्य प्रथम-सी. ई. ओ. रूपेण नियुक्तः। अयोध्यायां मणिराम दास छवानी इत्यत्र न्यासाध्यक्षस्य महन्त नृत्यगोपाल दासस्य आध्यक्षे आयोजिते न्यासस्य सभायाः अनन्तरं नियुक्तेः घोषणाऽभवत्।

## भारत-अफगानिस्तान-संयुक्त-कार्य-समूहेन समीक्षोपवेशनम् आयोजितम्



भारत-अफगानिस्तानयोः व्यापार-विषयक-संयुक्त-कार्य-समूहस्य द्वयोः देशयोः द्विपक्षीय-व्यापारस्य आर्थिक-सहयोगस्य च सुदृढीकरणार्थम् उपायानां समीक्षायै एका मन्त्रणा आयोजिता। वाणिज्य-उद्योग-मन्त्रालयेन ज्ञापितं यत् ह्यः आभासीय माध्यमेन आयोजिते अस्मिन् उपवेशने व्यापार-सुगमता, सीमाशुल्क-सहयोगः अफगान्-व्यापारिभ्यः प्रवेशानुमति-सौविध्यम् बैङ्किङ्-वित्तीय-सहयोगश्चेति प्रमुखाः विषयाः चर्चिताः। अनेनैव सह औषध-कृषि-व्यापारः, ऊर्जा-सहयोगः, निवेश-व्यापार-प्रोत्साहनं, सीमाशुल्क-सौविध्यम्, वस्तुवाहन-संयोजकता अथ च पत्तन-सम्बद्धानां विषयाणाम् उपरि विशदतया विचार-विमर्शः जातः।

### विदेशमन्त्री डा. एस्. जयशङ्करः अद्यारभ्य शनिवासरपर्यन्तं युक्रेन्-पोलण्ड्-देशयोः त्रिदिवसीयायां यात्रायां भविष्यति

विदेशमन्त्री डा. एस्. जयशङ्करः अद्यारभ्य शनिवासरपर्यन्तं युक्रेन्-पोलण्ड्-देशयोः त्रिदिवसीयायां यात्रायां भविष्यति। डॉ. जयशङ्करः युक्रेन्-देशस्य समकक्षेण आन्द्री सिबीहा इत्यनेन, पोलैण्ड्-देशस्य उपप्रधानमन्त्रिणा, विदेशमन्त्रिणा च राडोस्लाव् सिकोरस्की इत्यनेन च सह द्वैपाक्षिक-विमर्श करिष्यति। विदेशमन्त्रालयः अवदत् यत् इयं यात्रा द्वैपाक्षिकसम्बन्धान् वर्धयितुं केन्द्रिता भविष्यति अथ च क्षेत्रीयविकासविषयेषु परस्परहितानां विषयेषु च विचाराणाम् आदानप्रदानस्य अवसरम् अपि प्रददाति।



## सामञ्जस्य-पूर्ण संरक्षणं अथ च मानव-प्रकृति-सह-अस्तित्वम् एव पारिस्थितिक-संरक्षणस्य मूलभूतः आधारः भवेत् - भूपेन्द्र यादवः

केन्द्रीय-पर्यावरण-वन-जलवायु परिवर्तन-मन्त्री भूपेन्द्र यादवः प्रतिपादितवान् यत् सामञ्जस्य-पूर्ण संरक्षणं अथ च मानव-प्रकृति-सह-अस्तित्वम् एव पारिस्थितिक-संरक्षणस्य मूलभूतः आधारः भवेत्। श्रीयादवः नवदिल्ल्यां व्याघ्र-परिदृश्यानां संरक्षणं, जैव-अर्थव्यवस्था, पर्यावरण-पर्यटनं च आजीविकायाः आय-सृजनस्य च स्तम्भाः इति मुख्य विषयम् अधिकृत्य आयोजितायाः द्वि-दिवसीयायाः अन्ताराष्ट्रिय-कार्यशालायाः उद्घाटनसत्रे सम्बोधयन् एतान् विचारान् प्राकटयत्।

### भारतीय-ऋतु-विज्ञान-विभागेन पूर्वीमध्य-प्रदेशे अतिप्रबलवृष्ट्यै रक्तवर्णपरा सञ्चेतना प्रसारिता

भारतीय-ऋतु-विज्ञान-विभागेन पूर्वीमध्य-प्रदेशे अतिप्रबलवृष्ट्यै रक्तवर्णपरा सञ्चेतना प्रसारिता। ऋतु-विभागानुसारं असम-मेघालय-विहार-छत्तीसगढ-उत्तरप्रदेश-उत्तराखण्ड-पश्चिमबङ्गाल-सिक्किम-राज्यानां कतिपयेषु स्थानेषु प्रबलात् अतिप्रबल-वृष्टेः पूर्वानुमानं वर्तते। अपरत्र ऋतुविभागेन अरुणाचलप्रदेश-हरियाणा-चण्डीगढ-दिल्ली-हिमाचलप्रदेश-झारखण्ड-नागालैण्ड्-मणिपुर-मिजोरम्-त्रिपुरा-पञ्जाब-विदर्भ-पश्चिम-मध्यप्रदेशेषु प्रबल-वृष्टेः सम्भावना प्रकटिता।




## सर्वकारेण वर्ष २०२४ कृते तेनज़िङ्ग नोर्गे राष्ट्रिय-साहसिक-पुरस्काराणां घोषणा कृता

सर्वकारेण वर्ष २०२४ कृते तेनज़िङ्ग नोर्गे राष्ट्रिय-साहसिक-पुरस्काराणां घोषणा कृता अस्ति। एते पुरस्काराः साहसिकक्षेत्रे उत्कृष्टोपलब्धियुक्तान् जनान् समाद्रियन्ते, तथा च चुनौतीपूर्ण-परिस्थितिषु सहनशक्तिम्, विपत्तिस्वीकरणक्षमताम्, सामूहिककार्यम् (टीम-वर्क), त्वरितं प्रभावकारि च निर्णयस्वीकरणक्षमतां प्रोत्साहयन्ति। एते पुरस्काराः चतुर्षु विभागेषु—स्थलीय-साहसिककार्यम्, जल-साहसिककार्यम्, वायु-साहसिककार्यम्, आजीवनोपलब्धिक्षेत्रम् च—दीयन्ते। प्रत्येकस्मै पुरस्कारविजेत्रे एका प्रतिमा, एकं प्रमाणपत्रम्, पञ्चदशलक्षं (१५ लक्षं) रूप्यकाणां पुरस्कारराशिः च प्रदास्यते। स्थलीय-साहसिककार्य-विभागे बलजीत कौर महोदयायै स्काल्जाङ्ग रिग्ज़िन् महोदयाय च, जल-साहसिककार्य-विभागे रिमो साहा महोदयाय, आजीवनोपलब्धि-विभागे च शिवप्रसादचमोली महोदयाय पुरस्कारप्रदानस्य घोषणा कृता अस्ति। एषः चयनप्रक्रिया राष्ट्रिय-चयनसमित्याः अनुशंसाम् आधृत्य अभवत्। समित्या नामाङ्कनानां मूल्याङ्कनं कृतं तथा च राष्ट्रियसम्मानप्रदानाय विजेतॄणां संस्तुतिः कृता। एते पुरस्काराः युवासु साहसस्य, सहनशक्तेः, अनुशासनस्य, विपत्तिस्वीकरणक्षमतायाः, परस्परसहयोगस्य भावनां संवर्धयन्ति, तथैव च कठिनासु परिस्थितिषु शीघ्रतया प्रभावेण च प्रतिकर्तुं सामर्थ्यं प्रोत्साहयन्ति। राष्ट्रपतिः द्रौपदी मुर्मू महोदया 'राष्ट्रिय-क्रीडा-पुरस्कार-२०२५' इत्यनेन सह एतान् पुरस्कारान् वितरिष्यति। पुरस्कारसमारोहस्य तिथ्याः घोषणा पश्चात् भविष्यति।

## भारतीयपुरातत्त्वसर्वेक्षणेन (ASI) तेलङ्गनायाः 'गोल्लाला गुडी' मन्दिरं राष्ट्रियधरोहरसूच्यां सम्मिलितम्



भारतीयपुरातत्त्वसर्वेक्षणेन (ASI) तेलङ्गानायाः मुलुगु-जनपदस्य पालमपेट-स्थलं 'गोल्लाला गुडी' मन्दिरं राष्ट्रियमहत्त्वस्य स्मारकं घोषितम्। मन्दिरमिदं युनेस्को (UNESCO) सूच्यां सम्मिलितात् रामप्पामन्दिरात् समीपे वर्तते, तथा च स्वीयायै उत्कृष्टायै तक्षणकलायै (उत्कीर्णकलायै) स्थापत्यकलायै च प्रसिद्धम् अस्ति इति संस्कृति-मन्त्रालयेन विज्ञापितम्। एतत् मन्दिरं 'त्रिकूटालय'-शैल्यां निर्मितम् अस्ति। अत्र पूर्वाभिमुखः एकः मण्डपः, परितः च त्रीणि गर्भगृहाणि सन्ति। देशे राष्ट्रियमहत्त्वस्य स्मारकेभ्यः 'प्राचीनस्मारक-पुरातत्त्वस्थल-अवशेष-अधिनियम, १९५८' अन्तर्गतं संरक्षणं प्रदीयते। भारतीयपुरातत्त्वसर्वेक्षणं तादृशानां स्मारकानां संरक्षणस्य, अनुरक्षणस्य, सर्वसाधारणानां कृते नियन्त्रितप्रवेशस्य च व्यवस्थां करोति।







# हिमाचलं विनाशयिष्यति लॉटरी, जयरामस्य पक्षः अभ्यासः जातः चेत् गृह-परिवाराः लुण्ठिताः भविष्यन्ति

**हिमसंस्कृतवार्ताः - शिमला।**हिमाचलप्रदेश-विधानसभायाः मानसून-सत्रे बुधवासरे सदनस्य कार्यविधिः आरभ्यते स्म, तस्मात् पूर्वं भाजपा-विधायक-दलेन परिसरस्य अन्तः प्रदेश-सर्वकारस्य लॉटरी-व्यवस्थायाः विरुद्धं प्रदर्शनं कृतम्। विपक्षनेता जयराम ठाकुरस्य नेतृत्वे भाजपा-विधायकाः हस्तेषु घोषणाभिः लिखितानि फलकानि गृहीत्वा तीव्ररूपेण घोषणाः कृतवन्तः। अस्मिन् समये विपक्षस्य पक्षतः “लॉटरी-द्युतं पिहितं कुरुत, जीविकायाः प्रबन्धं कुरुत” इत्यादयः घोषाः उत्थापिताः।अस्मिन् प्रसङ्गे जयराम ठाकुरः अवदत् यत् हिमाचलः “देवभूमि” इति नाम्ना प्रसिद्धः अस्ति, अत्रत्याः जनाः देवतुल्याः सन्ति। याः दुष्प्रथाः सन्ति, ताभ्यः हिमाचलवासिनः सदैव दूरं तिष्ठन्ति। किन्तु सर्वकारेण अत्यन्तं असङ्गतं तर्कं प्रस्तुतं कृतम् अस्ति यत् हिमाचलः आर्थिकसङ्कटेन गच्छति। अतः हिमाचलेन स्वसंसाधनानि वर्धयितव्यानि। सर्वकारेण एकः विचित्रः निर्णयः गृहीतः यत् हिमाचलप्रदेशे सर्वकारः लॉटरीम् आरभते।

मुख्यमन्त्री तर्कं ददाति यत् अस्मात् व्यवस्थातः कस्यापि जनस्य लॉटरी-अभ्यासः न भविष्यति, एतत् तु केवलं भाग्यस्य क्रीडा अस्ति। जनाः आश्चर्यचकिताः सन्ति यत् मुख्यमन्त्रिणा यः तर्कः प्रदत्तः, तस्मात् हास्यास्पदं किमपि अन्यत् न भवितुम् अर्हति। एकतः हिमाचलः मादकद्रव्याणां तथा चिट्टायाः व्याप्तौ अस्ति, अपरतः सर्वकारः लॉटरी-व्यवस्थाम् आरभते। एतदपि एकः प्रकारस्य व्यसनमेव अस्ति, यस्य पङ्के यः एकवारं आपतति, सः तस्मात् बहिः निःसर्तुं न शक्नोति।लॉटरी-व्यवस्था पूर्वं निरस्ता कृता आसीत्, यतः अस्याः कारणेन बहूनां जनानां भूमयः नष्टाः अभवन्, जनाः विनष्टाः अभवन्। जनाः आत्महत्यां कर्तुं विवशाः अभवन्। लॉटरी-कृते जनाः धनं निवेशयन्ति स्म, किन्तु लॉटरी न लगति स्म। पुनः पुनः लॉटरीं स्थापयतः जनानाम् अस्याः अभ्यासः जातः, येन बहूनां परिवाराः विनष्टाः अभवन्। अधुना सर्वकारः पुनः जनानां मध्ये लॉटरी-सदृशम् अभ्यासं जनयितुम् इच्छति, यत् सर्वथा उचितं नास्ति।

लॉटरी-व्यवस्थां प्रारब्धुं गृहीतः निर्णयः नूतनसन्ततिं विनाशयितुं कर्ता भविष्यति। जयराम ठाकुरः अवदत् यत् पूर्वं सर्वकारेण उक्तं यत् वयं विजयायाः कृषिं वैधं करिष्यामः, अनेन सर्वकारस्य आयः वर्धिष्यते। विपक्षनेता अवदत् यत् वयं ज्ञातुम् इच्छामः—विजयायाः कृषेः सर्वकारस्य कियत् आयः प्राप्तः? सर्वकारः अद्यावधि अस्य प्रश्नस्य उत्तरं दातुं न शक्नोति।

## मुख्यमन्त्री सुक्खुः अवदत्— राज्यसर्वकारः पी.पी.पी.-प्रारूपेण रज्जुमार्गान् निर्मातुं सज्जः, विधायकाः निवेशकान् आनयन्तु

**हिमसंस्कृतवार्ताः - शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अवदत् यत् हिमाचलप्रदेशे पर्यटनस्य संवर्धनाय राज्यसर्वकारः रज्जुमार्ग-परियोजनाः स्थापयितुं सज्जः अस्ति, किन्तु निवेशकाः व्यवहार्यता-अन्तर-वित्तपोषणम् इच्छन्ति। तेन एतत् भविष्यति यत् रज्जुमार्गस्य यानपेटिका (ट्रॉली) रिक्तापि चलति चेत् अपि सर्वकारेण धनराशिः दातव्या भविष्यति। रज्जुमार्गस्य व्ययः अपि वर्धितः अस्ति। शिमलानगरे अस्माकं समीपे बाह्यसहायताप्राप्त-परियोजनायाः माध्यमेन 1200 कोटिरूप्यकाणां वित्तीयावसरः आसीत्, किन्तु रज्जुमार्गस्य व्ययः 2700 कोटिरूप्यकाणि आसीत्। अतः एतस्य निविदाप्रक्रियायाः निरस्तीकरणं कर्तव्यम् अभवत्। राज्यसर्वकारः केवलं पट्टाकालस्य (लीज्) अवधिं वर्धयितुं शक्नोति। यदि कश्चन रज्जुमार्ग-परियोजना 30 वर्षाणां कृते प्रदत्ता अस्ति, तर्हि तस्य अवधिः 35 वर्षाणि करिष्यामः, किन्तु वयं वित्तपोषणं कर्तुं न शक्नुमः। मुख्यमन्त्री विधानसभायां रज्जुमार्गसम्बद्धानां प्रश्नानां विषये हस्तक्षेपं कुर्वन् एतत् उत्तरं ददत्।

एतत्पूर्वं उपमुख्यमन्त्रिणः स्थाने उद्योगमन्त्री हर्षवर्धनचौहानः प्रश्नस्य उत्तरं दत्तवान्। काङ्ग्रेसविधायकः सञ्जय अवस्थी एतत् प्रश्नम् अपृच्छत्। अनुपूरकप्रश्ने भाजपाविधायकः रणधीरशर्मा आनन्दपुरसाहिब-श्रीनैनादेवी-रज्जुमार्गस्य विषयम् उत्थापितवान्। चुराहस्य विधायकः डॉ. हंसराजः भारतमाला-परियोजनायाः अन्तर्गतं चम्बायां प्रस्तावितानां रज्जुमार्ग-परियोजनानां विषये पृष्टवान्। मुख्यमन्त्री उत्तरं दत्तवान् यत् रज्जुमार्ग-परियोजनाः प्रस्ताविताः एव भवन्ति, किन्तु निवेशकाः अग्रे न आगच्छन्ति। विधायकाः अपि गम्भीरान् निवेशकान् आनेतुं साहाय्यं कुर्वन्तु।

## मुख्यमंत्री सुक्खूः अवदत्— प्रधानमन्त्री-आवास-योजना-विषये सर्वकारः आन्तरिक-परीक्षणं कारयिष्यति



हिमसंस्कृतवार्ताः - शिमला।प्रधानमन्त्री-आवास-योजना-ग्रामीणस्य अन्तर्गतं गृहाणां निर्माणस्य तथा बजट्-व्ययस्य सर्वकारः आन्तरिक-परीक्षणं कारयिष्यति। मुख्यमन्त्री सुखविन्द्रसिंहसुक्खुः विधानसभायां अवदत् यत् परीक्षणे एतत् ज्ञास्यते यत् पात्रेभ्यः परिवारेभ्यः कियत् धनराशिः प्राप्ता, तस्याः तुलनया कियत् निर्माणकार्यं सम्पन्नम् अभवत्, तथा च किञ्चित् भाग-राशेः प्रदाने विलम्बस्य कारणेन गृहाणि अपूर्णानि तु न अवशिष्टानि। विधायकस्य विक्रमठाकुरस्य प्रश्नस्य उत्तरं ददता सदने परागपुर-क्षेत्रे योजनायाः स्थितिः तथा सर्वेक्षणे सम्भावित-दोषाणां विषयः अपि उत्थापितः। विधायकः चन्द्रशेखरः अवदत् यत् कर्मचारिणां प्रमादस्य कारणेन बहवः पात्राः परिवाराः योजनायाः लाभात् वञ्चिताः अभवन्। सः अशुद्ध-सर्वेक्षणं संशोध्य पात्राणां जनानां योजनायां समावेशस्य आग्रहं कृतवान्।

## त्रिषु वर्षेषु ३१ जुलैतिथिपर्यन्तं प्रदेशे ८७,७१० आवासाः स्वीकृताः — अनिरुद्धसिंहः

पञ्चायतीराज-मन्त्री अनिरुद्धसिंहः अवदत् यत् विगतेषु त्रिषु वर्षेषु ३१ जुलैतिथिपर्यन्तं प्रदेशे ८७,७१० आवासाः स्वीकृताः सन्ति। परागपुर-विकासखण्डे १,१०८ आवासानां स्वीकृतिः प्रदत्ता अस्ति। लाभार्थिनां सत्यापनं भारत-सर्वकारस्य जियो-आधारित-आवास-प्लस-एप् इत्यस्य माध्यमेन क्रियते। मन्त्री अवदत् यत् सर्वेक्षणे ये पात्राः जनाः वञ्चिताः अवशिष्टाः, तेषां पुनः परीक्षणं ग्रामसभायाः अथवा खण्ड-विकास-अधिकारिणः (बीडीओ) माध्यमेन कर्तुं शक्यते। पात्राः इति सिद्धाः जनाः आगामी-वर्षस्य सूच्यां समावेशयितुं प्रयासः भविष्यति।

विधायकः सुखरामचौधरीः स्वीकृतेषु गृहेषु पूर्णानाम् अपूर्णानां च आवासानां संख्या तथा तेषाम् अपूर्णत्वस्य कारणं पृष्टवान्। मन्त्री अवदत् यत् योजनायां त्रिषु चरणेषु धनराशिः प्रदीयते तथा औपचारिकताः पूर्णाः जाताः अनन्तरमेव भाग-राशिः प्रदीयते। अतः प्रस्ताविते आन्तरिक-परीक्षणे धनराशेः प्रदाने तथा निर्माणकार्यस्य प्रगतेः मध्ये समन्वयस्य अपि परीक्षणं भविष्यति।

## चामुण्डातः आदि हिमानी चामुण्डां प्रति रज्जुमार्गस्य विषयः

धर्मशालायाः विधायकः सुधीरशर्मा चामुण्डातः आदि हिमानी चामुण्डां प्रति रज्जुमार्गस्य विषयम् उत्थापितवान्।

# काजीकोरैया–राघोपुरसीमातटबन्धस्य रक्षणाय मन्त्री कुमारशैलेन्द्रः सततं क्षेत्रे सन्नद्धः

## कटावग्रस्तस्थलानां निरीक्षणम्; जलरोधकपुटकस्थापनं, पादसंरक्षणं, तटच्छिन्नभागरक्षणं च शीघ्रं सम्पादयितुं निर्देशः



**भागलपुरम्, २ सितम्बर २०२६।**
**हिमसंस्कृतवार्ताः राघव नाथ झा**

काजीकोरैया–राघोपुरमार्जिनलतटबन्धे नदीप्रवाहजनितस्य तीव्रक्षरणस्य गम्भीरां स्थितिं दृष्ट्वा पथनिर्माणमन्त्री अभियन्ता कुमारशैलेन्द्रः तटबन्धस्य क्षेत्रवासिनां च सुरक्षां सर्वोच्चं महत्त्वं प्रदाय निरन्तरं क्षेत्रे उपस्थितः सन् संरक्षणकार्याणां निरीक्षणं करोति। नदीप्रवाहस्य दिशापरिवर्तनजनितेन तीव्रेण जलदाबेन तटबन्धस्य स्थैर्यं प्रभावितं न भवेत्, क्षेत्रवासिनां च जीवनधनस्य सुरक्षा सुनिश्चिता भवेत् इति उद्दिश्य रक्षणोपायाः शीघ्रतया क्रियन्ते।

मन्त्री बुधवासरे तटबन्धस्य अतिसंवेदनशीलानां क्षरणग्रस्तानां च स्थलानां प्रत्यक्षनिरीक्षणम् अकरोत्। तेन तटसंरक्षणाय प्रयुज्यमानानां जलरोधकपुटकानां स्थापनकार्यस्य, तटपादसंरक्षणस्य, तटच्छिन्नभागस्य रक्षणकार्यस्य, तथा नदीप्रवाहजनितजलदाबस्य न्यूनीकरणाय क्रियमाणानां विविधसंरक्षणोपायानां च स्थलीयस्थितिः अवलोकिता।

नदीमार्गे नौकाभिः आवश्यकस्थलेषु संरक्षणसामग्रीणां प्रेषणव्यवस्थायाः, जलरोधकपुटकानां यथास्थानं स्थापनस्य च अपि मन्त्री निरीक्षणं कृतवान्। तेन निर्देशितं यत् यत्र यत्र तटबन्धस्य स्थैर्यं संकटापन्नं दृश्यते, तत्र तत्र विलम्बमकृत्वा आवश्यकाः अभियांत्रिकीयाः संरक्षणव्यवस्थाः सुनिश्चिताः क्रियन्ताम्।

निरीक्षणसमये जलसंसाधनविभागस्य सचिवः चन्द्रशेखरसिंहः, जिलाधिकारी, प्रशासनिकाधिकारिणः तथा क्षेत्रे नियुक्ताः अभियन्तारः उपस्थिताः आसन्। मन्त्रिणा तैः सह तटबन्धस्य वर्तमानस्थितेः, अतिसंवेदनशीलस्थलानां, प्रचलितसंरक्षणकार्याणां च प्रगतेः विस्तृतः परामर्शः कृतः। तेन संरक्षणकार्येषु शीघ्रतां, निरन्तरतां, तकनीकीदृष्ट्या सम्यगुपायानां तत्कालं कार्यान्वयनं च सुनिश्चितयितुं सम्बन्धिताधिकारिभ्यः स्पष्टाः निर्देशाः प्रदत्ताः।

### जलप्लावनपीडितानां सुविधानामपि निरीक्षणम्

मन्त्री मध्यविद्यालयशङ्करपुरे जलप्लावनपीडितजनानां कृते क्रियमाणानां भोजनव्यवस्थायाः, निवासव्यवस्थायाः तथा अन्यासां आवश्यकसुविधानां विषयेऽपि जानकारीं प्राप्तवान्। तेन प्रशासनिकाधिकारिभ्यः क्षेत्रे जनानाम् आवागमनं निर्विघ्नं भवेत्, आवश्यकतानुसारं यातायातव्यवस्था सुदृढा सुव्यवस्थिता च क्रियताम् इति निर्देशः प्रदत्तः।

संरक्षणकार्याय आवश्यकसामग्रीणां अविच्छिन्नापूर्तिः भवेत् इत्युद्देश्येन पथनिर्माणविभागेन यत्र भारवाहनानां गमनागमनं भवति, तस्मिन् मार्गे सुदृढाधारस्तरस्य निर्माणकार्यं क्रियमाणम् अस्ति। अनेन संरक्षणसामग्रीणां, जलरोधकपुटकानां तथा अन्येषाम् आवश्यकद्रव्याणां कार्यस्थलं प्रति शीघ्रं सुरक्षितं च परिवहनं सुलभं भविष्यति।

**मन्त्री अभियन्ता कुमारशैलेन्द्रः अवदत्—**
“काजीकोरैया–राघोपुरतटबन्धस्य रक्षणाय सर्वेषु स्तरेषु पूर्णतत्परतया कार्यं प्रचलति

# श्रीकृष्णस्य आदर्शानुसरणेनैव समृद्धबिहारस्य स्वप्नं साकारं भविष्यति — सम्राट् चौधरी

## मिलर-प्राङ्गणे त्रिदिवसीयस्य कृष्णोत्सवस्य शुभारम्भः; अधर्मान्याययोः प्रतिरोध एव श्रीकृष्णस्य प्रमुखः सन्देशः

**पाटलिपुत्रम्, २ सितम्बर २०२६।**
**हिमसंस्कृतवार्ताः राघव नाथ झा**

बिहारस्य मुख्यमन्त्री सम्राट् चौधरी बुधवासरे वीरचन्द्रपटेलमार्गस्थिते मिलर-प्राङ्गणे आयोजितस्य त्रिदिवसीयस्य कृष्णोत्सवस्य दीपप्रज्वालनेन विधिवत् शुभारम्भम् अकरोत्। अस्मिन् अवसरे मुख्यमन्त्री अवदत् यत् भगवान् श्रीकृष्णेन अधर्मस्य अन्यायस्य च विरुद्धं संघर्षस्य मार्गः प्रदर्शितः। तस्य आदर्शानां जीवनव्यवहारे सम्यगनुसरणेनैव बिहारं विकासस्य समृद्धेः च नूतनशिखरं प्रति नेतुं शक्यते।

मुख्यमन्त्री उक्तवान् यत् भगवान् श्रीरामः मर्यादायाः आदर्शं प्रदत्तवान्, भगवान् श्रीकृष्णश्च अन्यायस्य विरुद्धं दृढतया स्थातुं संघर्षस्य प्रेरणां प्रदत्तवान्। श्रीकृष्णः केवलं देवतास्वरूपः एव न, अपितु गुरुस्वरूपोऽपि अस्ति। महाभारते भगवान् श्रीकृष्णेन स्वयं शस्त्रग्रहणं न करिष्यामीति प्रतिज्ञा कृता, तथापि धर्मस्य न्यायस्य च पक्षे सः अचलतया स्थितवान्। अर्जुनाय कर्तव्यबोधं प्रदाय तेन कर्मप्रधानस्य धर्मसम्मतस्य नीतिपथस्य च उपदेशः कृतः। सः अवदत् यत् प्रधानमन्त्री नरेन्द्रमोदी विकसितभारतस्य स्वप्नं साकारयितुं प्रयतमानः अस्ति, पूर्वमुख्यमन्त्री नीतीशकुमारः समृद्धबिहारस्य निर्माणस्य लक्ष्यं पुरस्कृतवान्, वर्तमानं बिहारशासनमपि समृद्धबिहारनिर्माणस्य संकल्पेन सततं कार्यरत् अस्ति। बिहारस्य सर्वप्रमुखा शक्तिः तस्य युवशक्तिः अस्ति।



द्विसहस्रपञ्चमवर्षात् द्विसहस्रषड्विंशतिवर्षपर्यन्तं राज्ये व्यापकः परिवर्तनक्रमः अभवत्; अधुना विकासस्य गतिः अधिकाधिकं वर्धनीया इति मुख्यमन्त्री उक्तवान्। मुख्यमन्त्री युवजनान् आहूतवान् यत् ते भगवान् श्रीकृष्णस्य आदर्शान् स्वजीवने सम्यगधिगत्य, कर्तव्यनिष्ठां धर्मभावनां च स्वीकृत्य, बिहारस्य विकासे सक्रियां भूमिकां निर्वहन्तु।

### आध्यात्मिक-सांस्कृतिक-ऐतिहासिकवैभवेन समन्विता बिहारभूमिः

सम्राट् चौधरी अवदत् यत् बिहारभूमिः ऐतिहासिकेन, आध्यात्मिकेन, सांस्कृतिकेन च वैभवेन अतिशयेन समृद्धा अस्ति। अस्यां पावनभूमौ दशमगुरुः श्रीगुरुगोविन्दसिंहः अजायत, भगवान् महावीरः अजायत, गौतमबुद्धश्च सम्यक्सम्बोधिं प्राप्तवान्। एतादृश्या गौरवशालिन्या ज्ञानधर्मसंस्कृतिपरम्परया समृद्धां बिहारभूमिं विकासस्य समृद्धेः च नूतनशिखरं प्रति नेतुं सर्वेषां सामूहिकं दायित्वम् अस्ति।

कार्यक्रमस्य प्रारम्भे मुख्यमन्त्रिणा स्वर्गीयाचार्यकिशोरकुणालस्य तैलचित्रे पुष्पाञ्जलिं समर्प्य श्रद्धाञ्जलिः अर्पिता।




# ९,१६९ कोटिरूप्यकाणाम् अनुदानेन बिहारस्य नगरीयविकासाय नूतनदिशा- ४३ नगराणां कार्ययोजना, १२ उपग्रह- आधारित- नगरनियोजनं च आधुनिकप्रौद्योगिक्या सह सुनियोजित- सतत- नगरीयविकासे सर्वकारस्य विशेषः बलः

**हिमसंस्कृतवार्ताः- राघवनाथ झा, पाटलिपुत्रम्**
बिहारस्य नगराणि भविष्यस्य आवश्यकतानाम् अनुरूपं विकसितुं राज्यसर्वकारेण नगरीय-नियोजनस्य, वित्तीयसंसाधनानाम्, आधुनिक-प्रौद्योगिक्याः समन्वये विशेषबलः प्रदत्तः। पाटलिपुत्रस्य अधिवेशनभवने नगरविकास-आवासविभागस्य, हडको- संस्थायाः संयुक्ततत्त्वावधाने 'बिहारस्य नगराणां सततनियोजन- प्रक्रियायाः अवबोधनं विषमतानां समाधानं च' इति विषये कार्यशाला आयोजिता। अस्यां कार्यशालायां बिहारस्य दीर्घकालिक-नगरीयविकास- रणनीतिविषये व्यापकः विमर्शः अभवत्। अस्मिन्नेव क्रमे षोडशतमस्य वित्तायोगस्य अनुशंसानुसारं वित्तीयवर्षात् २०२६-२७ तः २०३०-३१ पर्यन्तं बिहारस्य नगरनिकायेभ्यः ९,१६९ कोटिरूप्यकाणां अनुदानं प्राप्स्यते इति सूचितम्। कार्यशालायाः अध्यक्षतां कुर्वन् नगरविकास- आवासविभागस्य मन्त्री नीतीशमिश्रः अवदत् यत् नगरविकासः केवलम् आवासस्य मूलभूतसुविधानां च विकासे सीमितः नास्ति। विकसितानि सुव्यवस्थितानि च नगराणि राज्यस्य अर्थव्यवस्थायाः विकासकेन्द्राणि भवन्ति, निवेशं, रोजगारम्, आर्थिकक्रियाकलापांश्च आकर्षयन्ति। सः अवदत् यत् मुख्यमन्त्रिणः सम्राटचौधरीवर्यस्य स्पष्टं दृष्टिकोणम् अस्ति यत् बिहारस्य सर्वाणि नगराणि चरणबद्धरूपेण विकासस्य आर्थिक-क्रियाकलापानां च प्रमुखकेन्द्ररूपेण विकसितानि भवन्तु। तदर्थं तात्कालिकावश्यकतानां स्थाने दीर्घकालिकदृष्टिकोणः, दूरदर्शिता, सुनियोजित-नगरीयविकासश्च प्राथमिकतया स्वीकरणीयाः। नीतीशमिश्रवर्यः अवदत्- "अद्य वयं यां योजनां निर्मास्यामः, सा एव आगामिनां सन्ततीनां बिहारनगराणां स्वरूपं निर्धारयिष्यति।" सः अधिकारिभ्यः आह्वानं कृतवान् यत् कार्यशाला केवलम् अकादमिकाभ्यासरूपेण न सीमिता भवेत्, अपि तु विशेषज्ञाणाम् अनुभवात् शिक्षां गृहीत्वा तस्याः परिणतिः धरातले उत्तमनियोजनस्य प्रभावीक्रियान्वयनस्य च रूपेण भवेत्।

## ४३ नगराणां विनिर्माणयोजना, १२ कृत्रिमोपग्रहः- नगरयोजना च

नगरविकास- आवासविभागस्य प्रधानसचिवः विनयकुमारः अवदत् यत् बिहारस्य नगरीयविकासं सुनियोजितं सततं च कर्तुम् आधुनिकप्रौद्योगिक्याः, जीआईएस- आधारितनियोजनस्य प्रोत्साहनं दीयते। अधिकारिभ्यः प्रमाणाधारितयोजनानां निर्माणाय, प्राकृतिकसंसाधनानां संरक्षणं ध्यात्वा निर्माणयोजना निर्मातुं प्रशिक्षणं प्रदीयते। तेन सूचितं यत् राज्ये ४३ नगराणां निर्माणयोजना निर्मीयन्ते। तदतिरिक्तं १२ नवीन- उपग्रह-नगरयोजनां विकसितुं कार्यमपि प्रचलति। एतदर्थं हडको- संस्थया सह एकलक्षकोटिरूप्यकाणां ऋणसुविधा-सीमायाः सहमति अपि कृता अस्ति।

## नगरनिकायेभ्यः प्राप्स्यते ९,१६९ कोटिरूप्यकाणाम् अनुदानम्

मन्त्री नीतीशमिश्रः अवदत् यत् षोडशतमस्य वित्तायोगस्य अनुशंसानुसारं वर्षे २०२६-२७ तः २०३०- ३१ पर्यन्तं बिहारस्य सर्वेभ्यः नगरनिकायेभ्यः आधारभूतानुदानस्य कार्यप्रदर्शन-आधारितानुदानस्य च रूपेण ९,१६९ कोटिरूप्यकाणि प्राप्स्यन्ति।
भारतसर्वकारात् राशेः विमोचनानन्तरं नगरनिकायानां मध्ये अस्याः राशेः वितरणं जनसंख्यायाः स्वस्रोत-राजस्वस्य च ९०:१० अनुपातेन भविष्यति। तेन उक्तं यत् अस्याः राशेः माध्यमेन नगरनिकायानां वित्तीयस्थितिः सुदृढा भविष्यति। मार्गाणां, जलापूर्तेः, स्वच्छतायाः, प्रकाशव्यवस्थायाः तथा अन्यासां नागरिकसुविधानां नगरीयावसंरचनानां च विकासे नूतना गतिः प्राप्स्यते। पाटलिपुत्रनगरनिगमाय प्रस्तावितस्य विशेषावसंरचनाघटकस्य, नगरीकरणान्तर्गतं प्राप्तस्य अनुदानस्य प्रभावीविनियोगाय विशेषावसंरचना-परियोजनानां समीक्षायै अनुमोदनाय च राज्यस्तरीय- उच्चशक्तिसम्पन्न- सञ्चालनसमितेः, राज्यस्तरीय-तकनीकीसमितेः, गठनाय मन्त्रिपरिषदः अनुमोदनमपि प्रदत्तम् अस्ति। मन्त्री अस्य निर्णयस्य कृते मुख्यमन्त्रिणः सम्राटचौधरीस्य मन्त्रिपरिषदश्च प्रति आभारं व्यक्तवान्। सः अवदत् यत् पर्याप्तवित्तीयसंसाधनैः नगरनिकायाः अधिकसक्षमाः, उत्तरदायिनः, वित्तीयरूपेण सुदृढाश्च कर्तुं शक्यन्ते।

## जलवायुपरिवर्तनात् प्राकृतिकापद्भ्यश्च सुरक्षितानि भविष्यस्य नगराणि

हडको-संस्थायाः अध्यक्षः सञ्जयकुलश्रेष्ठः अवदत् यत् देशे नगरीयजनसंख्या तीव्रगत्या वर्धमाना अस्ति। अतः भविष्यस्य नगराणां केवलं विस्तारः पर्याप्तः नास्ति, अपि तु तानि जलवायुपरिवर्तनस्य, प्राकृतिकापदां, भविष्यत्कालीन- विषमतानां च दृष्ट्या सुदृढानि कर्तव्यानि। तेन स्वच्छभारत- अभियानस्य, अमृत- योजनायाः, प्रधानमन्त्रिणः आवासयोजना-२ इत्यादीनां योजनानां, 'नगर- चैलेंज फण्ड' इत्यस्य माध्यमेन स्वच्छता, जलापूर्तिः, मलजलनिष्कासनम् अन्यासां च मूलभूतसुविधानां विकासे गतिवर्धनस्य सम्भावनाः प्रकाशिताः।

## अनियोजितविकासानन्तरं पुनर्रचना व्ययसाध्या

दिल्लीविकासप्राधिकरणस्य उपाध्यक्षः डॉ. एन. श्रवणकुमारः अवदत् यत् २०११ तमस्य वर्षस्य जनगणनानुसारं बिहारः देशस्य न्यूननगरीकृतराज्येषु अन्तर्भवति। तथापि आर्थिकविकासाय रोजगारस्य उत्तमावसराणां च सृजनाय नगरीकरणस्य प्रोत्साहनम् आवश्यकम् अस्ति। दिल्ली-जमशेदपुरयोः उदाहरणं दत्त्वा सः अवदत् यत् अनियोजितविकासानन्तरं नगराणां पुनर्रचना अत्यन्तं व्ययसाध्या कठिनं च भवति। अतः आरम्भादेव सुनियोजितविकासे बलं दातव्यम्। स्थानीयहितधारकाणां सहभागितया नगराणि अधिकं जीवनोपयोगीनि कर्तव्यानि, येन उत्तमावसराणां कृते जनानाम् अनावश्यकं पलायनं न भवेत्।

## "मुख्ययोजनायां कृत्रिमबुद्धेः आधुनिक-प्रौद्योगिक्याश्च उपयोगः

कार्यशालायां मुख्ययोजनायाः आवश्यकता, विधिसम्बद्धाः प्रावधानाः, प्रभावीनगरीयनियोजनम्, भूम्युपयोगमानचित्रं, नगरनियोजनं, जनसांख्यिकीय- आर्थिक-स्थानिकदत्तांशानां सङ्कलनं विश्लेषणं च इत्यादिषु विषयेषु विस्तृतः विचारविमर्शः अभवत्। नगरीयनियोजने कृत्रिमबुद्धेः, जीआईएस- प्रौद्योगिक्याः, आधुनिकप्रौद्योगिकीनां च उपयोगस्य सम्भावनाः अपि रेखाङ्किताः।

## संस्कृतसप्ताहस्य समापनसमारोहे संस्कृतभाषायाः संरक्षण-संवर्धनस्य सशक्तः सन्देशः

# त्रिलोकपुरविद्यालये उत्कृष्टविद्यार्थिनः पुरस्कृताः, संस्कृताध्यापिका दीपिकाशर्मा इत्यस्याः प्रयासानां प्रशंसा





**हिमसंस्कृतवार्ताः- आचार्यः देवेन्द्रशर्मा, त्रिलोकपुरम्।** राजकीय- वरिष्ठ- माध्यमिक- विद्यालये त्रिलोकपुरे संस्कृतसप्ताहस्य समापनसमारोहः अत्यन्तं हर्षोल्लासेन, गरिम्णा च सम्पन्नः अभवत्। कार्यक्रमस्य शुभारम्भः विद्यायाः अधिष्ठात्रीदेव्याः सरस्वत्याः वन्दनया, दीपप्रज्वलनेन च अभवत्। सम्पूर्णे विद्यालयपरिसरे संस्कृतभाषायाः, भारतीयसंस्कृतेः, संस्काराणां च संरक्षण- संवर्धनस्य प्रभावशाली सन्देशः प्रसारितः। समापनसमारोहे विद्यालयप्रबन्धन- समित्याः अध्यक्षः पवनभारद्वाजमहोदयः मुख्यातिथिरूपेण विशेषतया उपस्थितः आसीत्। तेन संस्कृतसप्ताहस्य अवधौ विद्यार्थिभिः प्रस्तुतानां विविधकार्यक्रमाणां, क्रियाकलापानां च मुक्तकण्ठेन प्रशंसा कृता। सः अवदत् यत् संस्कृतभाषा भारतीयसंस्कृतेः ज्ञानपरम्परायाः च महत्त्वपूर्णा आधारशिला अस्ति। अतः विद्यार्थिभिः संस्कृतभाषायाः अध्ययनं मनोयोगपूर्वकं कृत्वा तस्याः संरक्षणे संवर्धने च सक्रियतया योगदानं दातव्यम्। अस्मिन् अवसरे विद्यालयस्य प्रधानाचार्या प्रियातोमर- महोदया संस्कृतसप्ताहस्य विभिन्नेषु प्रतियोगितासु, गतिविधिषु उत्कृष्टं प्रदर्शनं कृतवद्भ्यः विद्यार्थिभ्यः पुरस्कारान् प्रदाय सम्मानितवती। सा विद्यार्थिनः सम्बोधयन्ती अवदत् यत् संस्कृतभाषा केवलं संवादस्य माध्यमं न, अपि तु भारतस्य समृद्धायाः ज्ञानपरम्परायाः, संस्कृतेः, संस्काराणां गौरवशालिन्याः च विरासतायाः सशक्तवाहिनी अस्ति। विद्यार्थिभिः संस्कृतस्य अध्ययनाध्यापनाभ्यां सह तस्याः प्रयोगः दैनन्दिनव्यवहारेऽपि करणीयः।

प्रधानाचार्यया संस्कृताध्यापिकायाः दीपिकाशर्मा- महोदयायाः, विशेषरूपेण प्रशंसा कृता। तया उक्तं यत् दीपिकाशर्मा- महोदयायाः सततप्रयासैः संस्कृतशिक्षणं रोचकं क्रियाकलापाधारितं च जातं, येन विद्यार्थिषु संस्कृतभाषां प्रति नवीनः उत्साहः, अनुरागः, जिज्ञासा च समुत्पन्ना। संस्कृतभाषायाः प्रति विद्यार्थिषु आत्मीयभावस्य जागरणे तथा तान् भारतीयसंस्कृतेः संस्कारैः च सम्बद्धु तस्याः योगदानं प्रशंसनीयम् अस्ति।

संस्कृतसप्ताहस्य सम्पूर्णे आयोजने विद्यार्थिभिः संस्कृतसम्भाषणं, श्लोकपाठः, संस्कृतभाषणं, संस्कृतगीतानि, प्रश्नोत्तरी, विविधाः संस्कृताधारिताः गतिविधयः उत्साहपूर्वकं सम्पादिताः। विभिन्नेषु कार्यक्रमेषु उत्कृष्टं प्रदर्शनं कृतवन्तः विद्यार्थिनः पुरस्कारेण सम्मानिताः, तेषां च उत्साहवर्धनं कृतम्। कार्यक्रमस्य सफलतायां विद्यालयस्य प्रधानाचार्यायाः सहितं समस्तस्य अध्यापकवृन्दस्य सहयोगः अत्यन्तं प्रशंसनीयः आसीत्। सर्वैः अध्यापकैः संस्कृतसप्ताहस्य विभिन्नेषु कार्यक्रमेषु विद्यार्थिनां मार्गदर्शनं, प्रोत्साहनं तथा उत्साहवर्धनं समर्पणभावेन कृतम्। समापनसमारोहे प्रधानाचार्यया विद्यालय- प्रबन्धन- समित्याः अध्यक्षस्य, समस्तसदस्यानां तथा अध्यापकवृन्दस्य विशेषरूपेण आभारः प्रकटितः। तया उक्तं यत् सर्वेषां सहयोगेन सामूहिकप्रयासेन च एव संस्कृतसप्ताहस्य सफलतापूर्वकम् आयोजनं सम्भवितम्। अन्ते समुपस्थितानां सर्वेषां अतिथीनां, विद्यालय- प्रबन्धन- समित्याः सदस्याणां, अध्यापकानां, विद्यार्थिनां च धन्यवादं ज्ञापयित्वा संस्कृतसप्ताहस्य विधिवत् गरिमापूर्णं च समापनं सम्पन्नम्। सम्पूर्णेन कार्यक्रमेण विद्यार्थिषु संस्कृतभाषां प्रति नवीनोत्साहः, अनुरागः, गौरवबोधः च सञ्चारितः। कार्यक्रमः संस्कृतभाषायाः संरक्षण-संवर्धनाय विद्यार्थिसमाजे सकारात्मकां प्रेरणां प्रदाय स्मरणीयः अभवत्।

# संस्कृतसप्ताहोपलक्ष्ये आयोजितानां विविध- प्रतिस्पर्धानां प्रतिवेदनम्

**हिमसंस्कृतवार्ताः- तुङ्गेशः।**

राजकीय- संस्कृत- महाविद्यालय- तुङ्गेशे दिनाङ्के 26/08/2026 संस्कृतसप्ताहस्योपलक्ष्ये अन्ताराजीय- संस्कृतदिवसस्य आयोजनं कृतम्, यस्य अध्यक्षता डॉ. लीलाधरवात्स्यायन- प्राचार्यचराः संस्कृतमहाविद्यालयशिमला अकुर्वन्। अस्मिन् अवसरे संस्कृत-अकादम्याः सचिवचराः डॉ. केशवानन्दकौशलमहोदयाः मुख्यातिथिरूपेण सम्प्राप्ताः आसन्। अस्मिन्नैव क्रमे सारस्वातिथिरूपेण केन्द्रीयविश्वविद्यालय- धर्मशालातः डॉ. रणजीतशर्मणः उपस्थिताः आसन्। महाविद्यालयस्य कर्मठप्राचार्याः डॉ. ज्ञानेश्वरशर्मणः कार्यक्रमे अभ्यागतानां सर्वेषाम् अतिथीनां परिचयोपस्थापनपूर्वकस्वागतवचोभिः सभाम् उपकृतवन्तः। अस्मिन् अवसरे महाविद्यालये विविधानां प्रतियोगितानाम् आयोजनम् अभूत्। वेदमन्त्रोच्चारणं, संस्कृतभाषणम्, श्लोकोच्चारणं, संस्कृतगीतिकागानं, लघुप्रश्नोत्तरी च। एतासु प्रतियोगितासु वेदमन्त्रोच्चारणप्रतियोगितायां चत्वारः छात्राः भागं ग्रहीतवन्तः किञ्च विशालः प्रथमं, प्रवीणशर्मा द्वितीयं, गौरवश्च तृतीयं स्थानम् अलभन्त। अस्यामेव प्रतियोगितायाम् आयुषाय प्रोत्साहनपुरस्कारः प्रदत्तः। संस्कृतभाषण- प्रतियोगितायां षड् छात्राः आसन् यत्र सूर्यांशः प्रथमं, ऋषभः द्वितीयं, सोजलश्च तृतीयं स्थानं प्राप्तवन्तः। अत्रैव प्रतियोगितायां योगिता प्रोत्साहनपुरस्कारं प्राप्तवती। श्लोकोच्चारण- प्रतियोगितायां षड् छात्राः आसन् यत्र गुञ्जनः प्रथमं, अक्षयः द्वितीयं, मल्लिका च तृतीयं स्थानं स्वीकृतवन्तः, इशीमा प्रोत्साहनपुरस्कारं लब्धवती। संस्कृतगीतिकागानप्रतियोगितायाम् आहत्य चत्वारः बालाः आसन् यत्र गुञ्जनः प्रथमं, अक्षयः द्वितीयं, सिद्धार्थशर्मा च तृतीयं स्थानं प्राप्तवन्तः, मल्लिका च प्रोत्साहनपुरस्कारं लब्धवती। लघुप्रश्नोत्तरीप्रतियोगितायां दलचतुष्टयम् आसन् यत्र ऋषभ-रीने प्रथमे, सचिन- स्नेहावर्मे द्वितीये, सिद्धार्थशर्मा-विशालौ च तृतीयं स्थानं प्राप्तवन्तः। गौरव-विशालौ प्रोत्साहनपुरस्कारं प्राप्तवन्तौ। कार्यक्रमस्य अध्यक्षः डॉ. लीलाधरवात्स्यायनः संस्कृतस्य महत्त्वविषये प्रकाशं प्राक्षिपत्। कार्यक्रमस्य मुख्यातिथयः डॉ. केशवानन्दकौशलमहोदयाः सर्वान् छात्रान् संस्कृतभाषां प्रति प्रेरितवन्तः। सारस्वतातिथयः डॉ. रणजीतशर्माणः छन्दशास्त्रस्य विषये विस्तृतं व्याख्यानं दत्तवन्तः।

**अस्मिन् अवसरे राजकीय- संस्कृतमहाविद्यालय-सुन्दरनगरम् इत्यस्य प्राचार्याः डॉ. खुशवन्तमहोदयाः, दर्शनाचार्यः डॉ. सन्तोषशर्माणः, चकमोह महाविद्यालयात् साहित्याचार्यः डॉ. जगदीशशर्माणः, संस्कृत- महाविद्यालय- डंगार इत्यतः डॉ. सन्नीकुमारः, संस्कृत- महाविद्यालय- नाहनम् इत्यतः डॉ. सोमदत्तशर्माणः, उपाधि-महाविद्यालयात् नेरवातः प्रो. दिनेशशर्माणः तुङ्गेशस्य पुरातन- छात्र-सङ्घस्य अध्यक्षाः शिवदत्तशर्माणः, शिक्षक- अभिभावक- सङ्घस्य अध्यक्षाः जयप्रकाशशर्माणश्च उपस्थिताः आसन्। मञ्चसञ्चालनं कार्यक्रमसंयोजिका डॉ. राधाशर्मा कृतवती। अस्मिन् कार्यक्रमे महाविद्यालयस्य समस्तपरिवारः उपस्थितः आसीत्।**




# सरदारपटेल- विश्वविद्यालयस्य वार्षिकी सामान्य सभायाः द्वितीयदिने क्रीडा- सहपाठ्यक्रम- गतिविधीन् च विषयकृत्य महत्त्वपूर्णः निर्णयः

**हिमसंस्कृतवार्ताः:- डॉ. अमित शर्मा,**

सरदारपटेल- विश्वविद्यालयः मण्डी इत्यत्र आयोजितायाः वार्षिकी सामान्यसभायाः द्वितीये दिने विश्वविद्यालयस्य क्रीडा सह पाठ्यक्रम गतिविधीः च अधिकव्यवस्थिताः व्यापकाः प्रभावपूर्णाः च कर्तुं दिशि अनेके महत्त्वपूर्णाः निर्णयाः गृहीताः। उपवेशने आगामि सत्रस्य अन्तर्महाविद्यालयीय क्रीडा दिनदर्शिकायाः, क्रीडा परिषदः नाम परिवर्तनस्य, क्रीडा सूचना मार्गदर्शिकायाः च स्वीकृत्याः, अनुदानस्य तथा च नूतन कार्यकारिणी परिषदः गठनस्य सहितानां विभिन्न महत्त्वपूर्ण विषयाणाम् उपरि विचार विमर्शः कृतः।

**कुलपतिः आचार्यः ललितकुमार अवस्थी महोदयः नूतन प्रयासस्य श्लाघां कृतवान्**

वार्षिक- सामान्यसभायाः समापनावसरे सरदार पटेल विश्वविद्यालय मण्डी इत्यस्य माननीयः कुलपतिः आचार्यः ललितकुमार अवस्थी महोदयः मुख्यातिथिरूपेण उपस्थितः आसीत्। सः उपवेशने गृहीतानां निर्णयानां श्लाघां कुर्वन् अवदत् यत् विश्वविद्यालये क्रीडा सह पाठ्यक्रम गतिविधयः च विद्यार्थिनां सर्वाङ्गीण व्यक्तित्व विकासस्य महत्त्वपूर्णं माध्यमम् सन्ति। सः अवदत् यत् शिक्षया सह क्रीडायाः, संस्कृतेः, रचनात्मकतायाः, नेतृत्व क्षमतायाः च विकासः विद्यार्थिनः एकं सक्षमम् उत्तरदायिनं च नागरिकं निर्मातुं महत्त्वपूर्णं भूमिकां निर्वहति। कुलपतिः आचार्यः ललितकुमार अवस्थी महोदयः अवदत् यत् विश्वविद्यालयः विद्यार्थिभ्यः स्व प्रतिभां प्रदर्शयितुम् अधिकाधिकं मञ्चम् अवसरान् च उपलब्धयितुं प्रतिबद्धः अस्ति।

सः आशां प्रकटितवान् यत् नूतन क्रीडा सह पाठ्यक्रम गतिविधि परिषदः गठनेन क्रीडा सांस्कृतिक गतिविधिभ्यः च नूतना दिशा प्राप्स्यते तथा च विश्वविद्यालयेन सम्बद्धानां महाविद्यालयानां विद्यार्थिनः जनपद राज्य राष्ट्रीय स्तरेषु उत्तमं प्रदर्शनं करिष्यन्ति। सः परिषदः नव गठित पदाधिकारिभ्यः सदस्येभ्यः च शुभकामनाः यच्छन् अपेक्षाम् अकरोत् यत् परिषद् विश्वविद्यालयस्य क्रीडा सह पाठ्यक्रम गतिविधीः च अधिक पारदर्शिणः, व्यवस्थिताः, समावेशिनः, परिणामोन्मुखाः च निर्मातुं महत्त्वपूर्णां भूमिकां निर्वक्ष्यति।

**उपवेशने गृहीताः निर्णयाः-**

सरदारपटेल- विश्वविद्यालये क्रीडा- संस्कृति सह पाठ्यक्रमगतिविधीनां विस्तारस्य, विद्यार्थिनां सर्वाङ्गीणविकासस्य दिशि महत्त्वपूर्णः प्रयासः मन्यते। विश्वविद्यालय प्रशासनं विद्यार्थिनां प्रतिभां प्रोत्साहयितुं तथा च तान् विभिन्न स्तरेषु स्व क्षमतां प्रदर्शयितुम् अधिक अवसरान् उपलब्धयितुं स्व प्रतिबद्धताम् पुनः दृढीकृतवान्।

उपवेशने आगामिसत्राय अन्तर्महाविद्यालयीय क्रीडा दिनदर्शिका अन्तिमरूपेण निर्धारिता। दिनदर्शिकायां पुरुष- महिलावर्गयोः कृते आहत्य एकविंशतिः क्रीडानां द्विचत्वारिंशत् आयोजनानि निर्धारितानि सन्ति। विश्वविद्यालयेन सम्बद्धेषु महाविद्यालयेषु निर्धारित कार्यक्रमानुसारम् एतासां प्रतियोगितानाम् आयोजनं भविष्यति।

उपवेशने एकं महत्त्वपूर्णं निर्णयं गृह्णन् सरदारपटेल- विश्वविद्यालय- क्रीडापरिषदः नाम परिवर्त्य सरदारपटेल- विश्वविद्यालय- क्रीडा सह पाठ्यक्रमगतिविधि परिषद् इति कर्तुं निर्णयः गृहीतः। परिषदः कार्यक्षेत्रे इदानीं क्रीडाभिः सह विद्यार्थिनां विभिन्नाः सह- पाठ्यक्रम- सांस्कृतिक- गतिविधयः अपि व्यापकरूपेण सम्मिलिताः भविष्यन्ति। अस्य निर्णयस्य उद्देश्यं विद्यार्थिनां सर्वाङ्गीण विकासाय तेभ्यः क्रीडायाः, संस्कृतेः, रचनात्मकतायाः, अन्य- सहपाठ्यक्रम- गतिविधीनां च अधिक अवसरान् उपलब्धयितुम् अस्ति।

एतदतिरिक्तम् उपवेशने सरदारपटेल- विश्वविद्यालय- क्रीडा- सूचना- मार्गदर्शिकायै अपि स्वीकृतिः प्रदत्ता। एषा मार्गदर्शिका विश्वविद्यालयस्य क्रीडा गतिविधीनां, प्रतियोगितानां, नियमानां, प्रक्रियाणां, सम्बद्ध व्यवस्थानां च कृते एक महत्त्वपूर्ण सन्दर्भ लेख रूपेण उपयुक्ता भविष्यति। अनेन विश्वविद्यालयस्य सम्बद्ध महाविद्यालयेषु क्रीडा युवा गतिविधीनाम् उत्तम सञ्चालनाय, विद्यार्थिनाम् अधिक सक्रिय भागीदारितायै प्रोत्साहनं प्राप्स्यते।

## नूतन स्पोर्ट्स एंड को करिकुलर एक्टिविटीज काउंसिल इत्यस्य गठनम्

उपवेशने सरदारपटेल- विश्वविद्यालय स्पोर्ट्स एंड को- करिकुलर एक्टिविटीज काउंसिल इत्यस्य नूतन कार्यकारी परिषदः अपि गठनं कृतम्। परिषदि राजकीय महाविद्यालय सैंज इत्यस्य प्राचार्या डॉ. सुजाता अध्यक्षा, एमएलएसएम महाविद्यालयस्य सहायक आचार्यः लोकेशशर्मा उपाध्यक्षः नियुक्तः।

नूतन- कार्यकारी- परिषदि राजकीय- महाविद्यालय कोटली इत्यस्य प्राचार्या डॉ देविका वैद्य, राजकीय- महाविद्यालयः द्रंग नरला इत्यस्य प्राचार्या डॉ. निशावैद्य, राजकीय- महाविद्यालय बल्द्वाडा इत्यस्य डॉ सञ्जयशर्मा, राजकीयः महाविद्यालयः हरिपुर मनाली इत्यस्य डॉ. ज्योति बाला, एमएलएसएम महाविद्यालयः सुन्दरनगर इत्यस्य डॉ. कमलेशगौतमः, राजकीयः महाविद्यालयः मण्डी इत्यस्य डॉ. अञ्जु पाठक सदस्याः नियुक्ताः।

कार्यक्रमे वल्लभ- राजकीय- महाविद्यालय मण्डी इत्यस्य प्राचार्यः डॉ. सञ्जीवशर्मा, राजकीय महाविद्यालय हरिपुर मनाली इत्यस्य प्राचार्या डॉ. शेफाली, राजकीय- महाविद्यालयः बंजार इत्यस्य प्राचार्यः डॉ. आर. के. सिंह, राजकीयः महाविद्यालयः निहरी इत्यस्य कार्यकारी प्राचार्यः शशी पालः, राजकीयः महाविद्यालयः पनारसा इत्यस्य प्राचार्यः डॉ उर्सेम, सहायक- निदेशकः डॉ. हितेशकुमारः, इतिहासविभागस्य विभागाध्यक्षः डॉ. राकेशकुमारशर्मा इत्येतैः सह अन्ये गण्यमान्याः च उपस्थिताः आसन्।

**रविः खरिडेहालः - बेङ्गलूरु।**

## २०३० तमवर्षपर्यन्तं ईआरडी-आगमं $१०० बिल्लियन् इत्यर्थः ९,४९,७०० कोटिरूप्यकाणि पारयिष्यते।

ईआरडी अर्थः अभियांत्रिकी अनुसन्धान विकासः च अस्ति । वैश्विक ईआरडी-व्ययः २०३० तमे वर्षे $२.५ ट्रिल्लियन् पर्यन्तं भविष्यति इति अनुमानितम् अस्ति । ८-९% वृद्धिमानम् आधारेण नास्सकांसंस्थया उक्तम्।

वित्तवर्षे २०२५-२६ ईआरडी सेवा आगमस्य $६३ बिल्लियन् अस्ति । २०३० तमवर्षपर्यन्तं ईआरडी-आगमं $१०० बिल्लियन् पारयिष्यते ।

एआइ ईआरडी इत्यस्य मूलं प्रति गच्छति । उत्पादानाम् परिकल्पनायाः पुनः आकारः, उत्पादानाम् परीक्षणं पुनः आकारः, उत्पादानाम् संचालनं पुनः आकारः च ।

भारतीय ईआरडी संस्थानां कृते निष्पादनात् परं गत्वा उत्पादविकासस्य पूर्णजीवनचक्रे भागं ग्रहीतुं अवसरः भविष्यति।



# लघ्वीकाश्यां मण्ड्यां गुरुवासरे भविष्यति भव्यः संस्कृतसप्ताहमहोत्सवः, आयोज्यन्ते विविधाः संस्कृतप्रतियोगिताः

**हिमसंस्कृतवार्ताः- लघ्वीकाशी मण्डी।** देवभूमेः हिमाचलप्रदेशस्य सुप्रसिद्धायां 'छोटी काशी' इति नाम्ना विश्रुतायां मण्ड्यां गुरुवासरे मण्डलस्तरीयस्य 'संस्कृतसप्ताह- समारोप-महोत्सवस्य' भव्यम् आयोजनं भविष्यति। हिमाचल- राजकीय- संस्कृत- शिक्षक- परिषद्-मण्डलमण्डलेन आयोज्यमानेऽस्मिन् समारोहे सम्पूर्णमण्डलात् विविधशिक्षाखण्डेभ्यः प्रायः १२० प्रतिभावन्तः बालप्रतिभागिनः स्वसंस्कृतप्रतिभां प्रदर्शयिष्यन्ति। कार्यक्रमे मुख्यतया चतस्रः विविधाः मण्डलस्तरीयप्रतियोगिताः आयोज्यन्ते, यासु विशुद्धोच्चारणाय श्लोकोच्चारण-प्रतियोगिता, सुरभारत्याः लालित्यप्रदर्शनाय संस्कृतगीत-प्रतियोगिता, पौराणिकादर्शचरित्राणां साक्षात्कारात्मिका संस्कृतरूपसज्जा- प्रतियोगिता, छात्राणां मेधापरीक्षणाय संस्कृताधारिता प्रश्नोत्तरी-प्रतियोगिता च मुख्याः सन्ति।

परिषद्-पदाधिकारिभिः निगदितं यत् विगते सप्ताहे मण्डलमण्डलस्य सर्वेषु विद्यालयेषु संस्कृतशिक्षकैः संस्कृतमय-वातावरणस्य निर्माणाय प्रशंसनीयाः उपक्रमाः कृताः। प्रातःकालीन- प्रार्थनासभासु संस्कृतवार्तावाचनं, संस्कृतप्रदर्शिन्यः, विद्यालयेषु संस्कृतनामकरण-फलकानि, दैनन्दिन-संभाषणानि तथा च आधुनिकप्रविध्युपयोगेन निर्मितानि लघुचलच्चित्राणि छात्राणां ध्यानाकर्षणस्य मुख्यानि केन्द्राणि आसन्।

अस्मिन् समापन-महोत्सवे संस्कृतसंवर्धने श्रेष्ठकार्यं कृतवन्तः विद्यालयाः, 'संस्कृत-सेवा-दूताः' इति ख्याताः निष्ठावन्तः शिक्षकाः तथा च प्रतियोगितातः उत्कृष्टाः छात्राः विशेषरूपेण प्रशस्तिपत्रैः स्मृतिचिह्नैश्च सम्मानीयन्ते। अस्य कार्यक्रमस्य मुख्यमुद्देश्यं छात्रेषु सदाचारस्य, सच्चरित्रस्य, समभावस्य च बीजारोपणं कृत्वा तान् दुर्व्यसनेभ्यः विरतान् विधातुं देववाणीं प्रति संस्कारान् दृढीकर्तुं च वर्तते। महोत्सवं सफलीकर्तुं मण्डलमण्डलस्य संस्कृतप्रेमिणः, शिक्षकाः, गणमान्यातिथयश्च उत्साहेन संलग्नाः सन्ति।




# “एकं वृक्षं मातुः नाम्ना” अभियानस्य अन्तर्गतं वृक्षारोपणकार्यक्रमः

**हिमसंस्कृतवार्ताः- डांडा पागर, २ सितम्बर।** राजकीय- उच्चविद्यालये डांडा पागरे पर्यावरण-संरक्षणस्य प्रकृतिप्रेमस्य च भावनां जनमानसेषु जागरयितुं “एकं वृक्षं मातुः नाम्ना” इति अभियानस्य अन्तर्गतं वृक्षारोपणकार्यक्रमः श्रद्धया उत्साहेन च आयोजितः।

कार्यक्रमस्य शुभारम्भः विद्यालयस्य संस्कृत-शिक्षकः, विद्यालयस्य प्रधानाचार्यस्य करकमलाभ्याम् अभवत्। अस्मिन् अवसरे विद्यालयस्य आचार्याः, छात्र्यश्च उत्साहपूर्वकं भागं गृहीतवन्तः। छात्रैः विद्यालयस्य परिसरे विविधजातीयाः वृक्षाः रोपिताः। प्रत्येकं छात्र स्वमातुः नाम्ना वृक्षं रोपयित्वा तस्य संरक्षणस्य संवर्धनस्य च संकल्पं कृतवान्।

अस्मिन् प्रसङ्गे आचार्यैः वृक्षाणां पर्यावरणे महत्त्वं, प्राणवायोः संरक्षणम्, जलस्य संवर्धनं, जैवविविधतायाः रक्षणं च विषये विद्यार्थिभ्यः बोधनं प्रदत्तम्। प्रधानाचार्येण उक्तं यत् वृक्षाः पृथिव्याः जीवनाधाराः सन्ति। ते प्राणवायुं, फलानि, पुष्पाणि, छायां च प्रदाय मानवजीवनस्य पोषणं कुर्वन्ति। अतः वृक्षारोपणं न केवलं प्रकृतेः संरक्षणाय, अपितु भावीपीढीनां सुरक्षितजीवनाय अपि अत्यावश्यकम् अस्ति।

कार्यक्रमस्य समापनसमये उपस्थितैः सर्वैः पर्यावरणसंरक्षणस्य, वृक्षारोपणस्य तथा रोपितवृक्षाणां यथोचितं पालन-पोषणस्य च सामूहिकः संकल्पः कृतः। विद्यालयपरिवारस्य पक्षतः कार्यक्रमस्य सफलतायै सहयोगं प्रदत्तवद्भ्यः सर्वेभ्यः हार्दिकं कृतज्ञताज्ञापनं कृतम्।

# खण्डस्तरीय-क्रीडाप्रतियोगितासु जियाविद्यालयस्य छात्राणां विजयपताका



**हिमसंस्कृतवार्ता, पालमपुरम्:** अगस्तमासस्य ३१ दिनाङ्कतः सितम्बरमासस्य ०२ दिनाङ्कम् यावत् आयोजिताः १४ वर्षपर्यन्तस्य छात्र-छात्राणां खण्डस्तरीय-क्रीडाप्रतियोगिताः पालमपुर-खण्डस्य राजकीय-वरिष्ठ-माध्यमिक-विद्यालये सिद्धपुर-सहकारी-स्थले सफलाः सम्पूर्णाः जाताः। अस्मिन् आयोजने राजकीय-वरिष्ठ-माध्यमिक-विद्यालय-जिया इत्यस्य चतुर्विंशतिः (२४) छात्र-छात्राः कन्दुकक्षेपणम् (वॉलीबॉल), कबड्डी, पक्षकन्दुकम् (बैडमिन्टन) तथा च चतुरङ्ग-स्पर्धासु (शतरंज) सोत्साहं भागम् अगृह्णन्। अस्यां स्पर्धायां विद्यालयस्य छात्राः—सानिया, शानवी, शगुनः, अवनी, कात्यायनी, शवनम् तथा मिताली—शारीरिक-शिक्षकस्य श्रीविकासकुमारस्य कुशल-मार्गदर्शने कन्दुकक्षेपण-प्रतियोगितायां खण्डस्तरे प्रथमं स्थानम् अलभन्त। तथैव पक्षकन्दुक-स्पर्धायां सानिया, नीतिका, शगुनः, शानवी च द्वितीयं स्थानं प्राप्नुवन्। चतुरङ्ग-प्रतियोगितायां वंशिका, अमिता, नीतिका तथा शिवानी प्रथमं स्थानं प्राप्य स्वीयस्य विद्यालयस्य, अभिभावकानाम्, शिक्षकाणां जिया-ग्रामस्य च नाम समुज्ज्वलीकृत्य गौरवान्वितम् अकुर्वन्।

विद्यालयस्य प्रधानाचार्यः श्रीरामप्रकाशवर्धन-महोदयः सर्वेभ्यः छात्रेभ्यः, छात्राभ्यः, प्रतिभागिभ्यश्च मङ्गलकामनाः प्राददात्, भविष्येऽपि एतादृशमेव उत्कृष्टं प्रदर्शनं कर्तुं सर्वान् प्रेरयत् च।



# कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्व-विद्यालयस्य सर्वदर्शनविभागेन १०८-व्याख्यानमालायाः एकविंशतितमं व्याख्यानं सम्पन्नम्

**हिमसंस्कृतवार्ताः- डॉ. निशिकान्त-पाण्डेयः, नलबारी, असमः**

कुमारभास्करवर्मसंस्कृत- पुरातनाध्ययन-विश्वविद्यालयस्य सर्वदर्शनविभागेन सर्वदर्शन-मन्थनपरिषदः संयुक्ततत्त्वावधाने आयोजितस्य १०८- व्याख्यानमालाकार्यक्रमस्य एकविंशतितमं (२१) व्याख्यानं श्रीश्रीमहापुरुषमाधवदेवस्य पावनतिरोभावतिथिमधिकृत्य अत्यन्तं गरिमामयवातावरणे साफल्येन सम्पन्नम्।

कार्यक्रमस्य शुभारम्भः लौकिकमङ्गलाचरणेन सह अभवत्। लौकिकमङ्गलाचरणं सर्वदर्शनविभागस्य प्रतिभावत्या छात्रया सुमीदासः इत्यनया मधुरस्वरेण विधत्तम्। तदनन्तरं सर्वदर्शनविभागस्य अध्यक्षः माननीयः प्रो. रणजीतकुमारतिवारीमहोदयः उपस्थितविदुषाम् अभ्यागतानां च स्वागतं कुर्वन् व्याख्यानस्य मुख्यमुद्देश्यं सविस्तरं स्पष्टीकृतवान्।तत्पश्चात् विभागस्य शोधच्छात्रा तपस्विनी कुमारी असमस्य भक्तिपरम्परायाः अमूल्यनिधिभूतं सुमधुरं बरगीतं प्रस्तुतवती, येन समस्तं सभागृहं भक्तिरसमयं जातम्। अस्य व्याख्यानस्य मुख्यविषयः "श्रीश्रीमधवदेवस्य जीवनदर्शनम्" इति आसीत्। अस्मिन् विषये मुख्यवक्तृरूपेण विश्वहिन्दूमहासंघसमित्याः अध्यक्षः, श्रीदक्षिणपाटगृहाश्रमीसत्रस्य सत्राधिकारः परमपूज्यः श्रीजनार्दनदेवगोस्वामीमहोदयः स्वकीयम् ओजस्विविचारगर्भितं वक्तव्यमुपस्थापितवान्। सः महापुरुषमाधवदेवस्य त्यागमयं जीवनं, तस्य भक्तिदर्शनम्, समाजसंस्कारकाः विचाराः असमीया- साहित्य-संस्कृत्योः तस्य अतुलनीयं योगदानं च सविस्तरं प्रतिपादितवान्। अस्मिन् गरिमामये कार्यक्रमे विश्वविद्यालयस्य समकुलपतिः आदरणीया आचार्या मल्लिकाकलिता महोदया विशेषरूपेण उपस्थिता भूत्वा कार्यक्रमस्य शोभां वर्धितवती। एतदतिरिक्तं सर्वदर्शनविभागस्य प्राध्यापिका उमामहेश्वरी बी, साहित्यविभागस्य अध्यक्षः प्रो. रातुलबुजरबरुवामहोदयः, दर्शनविभागस्य अध्यक्षः विकासभार्गवशर्मा, ज्योतिषविभागस्य आचार्यः गणेशप्रसादमिश्रः, अन्येषामपि विभागानां विभागाध्यक्षाः, प्राध्यापकाः, शोधच्छात्राः, अध्ययनरताः छात्रच्छात्राः च महत्या संख्यायामुपस्थिता आसन्। सम्पूर्णस्य अस्य कार्यक्रमस्य कुशलं सुव्यवस्थितं






च सञ्चालनं सर्वदर्शनविभागस्य शोधछात्रेण लिराजकाफ्ले महोदयेन कृतम्। कार्यक्रमस्य समापने सर्वदर्शनविभागस्य अतिथ्यध्यापिका मयूरीबरकाकतीमहोदया उपस्थितानां सर्वेषां गुरून्, वक्तृन्, छात्रान् च प्रति कृतज्ञतां प्रकटयन्ती धन्यवादज्ञापनमकरोत्। तदनन्तरं तया एव विश्वकल्याणस्य भावनां धृत्वा मङ्गलमयस्य कल्याणमन्त्रस्य पाठः कृतः, येन सह एव एषः ऐतिहासिकः कार्यक्रमः साफल्येन सम्पन्नः।

# 'भारतीयशास्त्रीयसङ्गीतं सर्वसङ्गीतस्य आधारः, कृत्रिमबुद्ध्या नास्ति किमपि भयम्'




**हिमसंस्कृतवार्ताः- सौरभः दे, बोकारो।**

***बनारस-घराणस्य गौरवपरम्परायाः संवाहकाभ्यां पं. रितेशमिश्रेण पं. रजनीशमिश्रेण च सह विशेषवार्ता***

भारतीयशास्त्रीयसङ्गीतं समस्तसङ्गीतस्य जननी अस्ति। तद्विना किमपि सङ्गीतं पूर्णत्वं न प्राप्नोति। रागाः रागिण्यश्च शास्त्रीयसङ्गीतस्य मूलाधाराः सन्ति- इति प्रतिपादनं बनारस-घराणस्य प्रसिद्धयोः गायकयोः पं. रितेशमिश्रस्य पं. रजनीशमिश्रस्य च। सोमवासरे डी.पी.एस. बोकारो-विद्यालये स्पिक मैके- संस्थायाः तत्त्वावधाने आयोजिते सांस्कृतिक- कार्यक्रमे ताभ्यां सह विशेषवार्तालापः अभवत्। पद्मभूषण-पं. राजनमिश्रस्य पुत्रद्वयं उक्तवत् यत् भारतीयशास्त्रीयसङ्गीतम् अस्माकं प्राचीनशास्त्रीयपरम्परायाः अमूल्या निधिः अस्ति। अद्यतनानां युवानां स्वकीयैः सांस्कृतिकमूलैः सह सम्बन्धः दृढः भवेत्, एतदर्थं विद्यालयानां भूमिका महत्त्वपूर्णा अस्ति। तौ उक्तवन्तौ यत् अस्मिन् द्रुतगतिके संसारे स्वकीयाभिः सांस्कृतिक-परम्पराभिः सह सम्बद्धाः एव जनाः वास्तविकां समृद्धिं प्राप्तुं शक्नुवन्ति। शास्त्रीयसङ्गीतं सर्वेषां न रोचेत्, तथापि तस्य प्रति सम्मानभावः सर्वेषां भवितव्यः। विद्यार्थिनः भारतीयसङ्गीतपरम्परायाः सह सम्बद्धान् कर्तुं स्पिक् मैके-संस्थायाः प्रयत्नाः प्रशंसनीयाः अनुकरणीयाश्च सन्ति। ए. आई. न प्रतिस्थापयितुं शक्नोति प्राकृतिकसङ्गीतम् कृत्रिमबुद्धेः (ए.आई.) विषये तौ स्पष्टतया उक्तवन्तौ यत् आधुनिकप्रौद्योगिकी स्वयमेव दोषपूर्णा नास्ति, किन्तु तस्याः दुरुपयोगः न करणीयः। अद्य केचन जनाः कृत्रिमबुद्धेः साहाय्येन स्वकीयस्वरं प्रसिद्धानां पार्श्वगायकानां स्वररूपेण परिवर्तयित्वा अनुचितरूपेण प्रयुञ्जते। एतादृशः प्रयोगः सङ्गीतस्य गौरवं न्यूनयति। तौ उक्तवन्तौ यत् कापि प्रौद्योगिकी प्राकृतिकसङ्गीतस्य स्थानं सम्पूर्णतया ग्रहीतुं न शक्नोति। अतः कृत्रिमबुद्ध्या भारतीयशास्त्रीयसङ्गीतस्य किमपि भयम् नास्ति। आधुनिकता आवश्यकी, किन्तु तस्याः प्रयोगः आवश्यकतानुसारमेव भवेत्।सङ्गीतस्य मूलं शास्त्रीयपरम्परायामेव मिश्र-भ्रातरौ उक्तवन्तौ यत् कालानुसारं चलचित्रसङ्गीते परिवर्तनं जातम्, तथापि तस्य मूलाधारः शास्त्रीयसङ्गीतमेव अस्ति। शास्त्रीयसङ्गीतस्य उत्थानाय तथा सांस्कृतिकजागरूकतायै समाजस्य मानसिकतायां परिवर्तनम् आवश्यकम्। सप्तदशवर्षाणाम् अनन्तरं पुनः बोकारो-नगरम् आगमनं ताभ्याम् अत्यन्तम् आनन्ददायकम् अनुभूतम्।

## त्रिदशकात् विश्वमञ्चे बनारस-घराणस्य गौरवम्

भारतीयशास्त्रीयसङ्गीते जुगलबन्दी अथवा युग्लगायनम् अत्यन्तं कठिनः कलाप्रकारः मन्यते। स्वरप्रावीण्यस्य परस्परसामञ्जस्यस्य च अद्भुतः समन्वयः अस्य विशेषता अस्ति।

बनारस-घराणस्य चतुर्शतवर्षप्राचीनायाः समृद्धायाः सङ्गीतपरम्परायाः षष्ठपीढ्याः संवाहकौ पं. रितेशमिश्रः पं. रजनीशमिश्रश्च पद्मभूषण-पं. राजन- साजनमिश्रयोः मार्गदर्शनेन संस्कारं प्राप्तवन्तौ। गतत्रिंशद्वर्षेभ्यः तौ विश्वस्य विविधेषु प्रतिष्ठितेषु मञ्चेषु भारतीयशास्त्रीयसङ्गीतस्य गौरवं वर्धयतः।

## ब्राह्मणः एतादृशी महासामर्थ्यशक्तिः या सम्पूर्णं विश्वम् एकत्रीकर्तुं शक्नोति- उमेशशर्मा काऊ

# उत्तराखण्डविद्वत्सभायाः सप्तदशः स्थापना दिवससमारोहः विदुषां विचारैः सांस्कृतिक- प्रस्तुतिभिश्च सम्पन्नः




**हिमसंस्कृतवार्ताः- देहरादूनम्।**
उत्तराखण्डविद्वत्सभायाः सप्तदशः स्थापना दिवससमारोहः बुधवासरे देहरादूननगरस्य राजारोडस्थिते गीताभवने टपकेश्वरमहादेव-मन्दिरस्य महन्तस्य पूज्यकृष्णागिरीमहाराजस्य विशेषसान्निध्ये आयोजितः। समारोहस्य अवसरे विद्वांसः सामाजिकक्षेत्रे सांस्कृतिकक्षेत्रे च सम्बद्धाः प्रतिनिधयः उत्साहपूर्वकं सहभागीभूय उत्तराखण्डस्य विद्वत्परम्परायाः संस्कृतभाषायाः भारतीयज्ञानपरम्परायाः सांस्कृतिकवैभवस्य च संरक्षणसंवर्धनयोः कृते सामूहिकां प्रतिबद्धतां प्रकटितवन्तः। समारोहस्य मुख्यातिथिः रायपुरविधानसभाक्षेत्रस्य विधायकः उमेशशर्मा काऊ उक्तवान् यत् ब्राह्मणसमाजः केवलं कश्चन वर्गः नास्ति अपि तु ज्ञानस्य संस्कारस्य संस्कृतेश्च एतादृशी महासामर्थ्यशक्तिः अस्ति या सम्पूर्णं विश्वम् एकत्रीकर्तुं सामर्थ्यं धारयति। सः उक्तवान् यत् भारतीयपरम्परायां ब्राह्मणस्य भूमिका सदैव समाजाय दिशाप्रदर्शनस्य, ज्ञानमाध्यमेन जनानां च परस्परं संयोजनस्य च अभवत्। वर्तमानकाले अस्य दायित्वस्य अधिकप्रभाविरूपेण निर्वहणस्य आवश्यकता वर्तते।समारोहस्य मुख्यवक्ता राष्ट्रियस्वयंसेवकसङ्घस्य उपाध्यक्षः पूर्वराज्यमन्त्री च आचार्यसुभाषजोशी उक्तवान् यत् अस्माकम् आत्मीयता एव अस्माकं सर्वातिशायिनी शक्तिः अस्ति। समाजे धर्मकर्मसम्बद्धाः अनेकाः भ्रान्तयः दृश्यन्ते। तासां भ्रान्तीनां निराकरणं ज्ञानस्य संवादस्य आत्मीयतायाश्च माध्यमेन कर्तुं शक्यते। सः उक्तवान् यत् विदुषां दायित्वं केवलं शास्त्राणाम् अध्ययनपर्यन्तं सीमितं नास्ति अपि तु समाजस्य मध्ये गत्वा भारतीयज्ञानपरम्परायाः सम्यक् व्याख्यानम् अपि तेषां महत्त्वपूर्णं दायित्वम् अस्ति।
समारोहस्य अध्यक्षतां उत्तराखण्डविद्वत्सभायाः अध्यक्षः आचार्यो हर्षपतिगोदियालः अकरोत्। सः उक्तवान् यत् उत्तराखण्डविद्वत्सभा स्थापनाकालात् आरभ्य अद्यावधि विदुषां कृते एकं सुदृढं मञ्चं प्रदातुं तथा प्रदेशस्य विद्वत्परम्परायाः संवर्धनं संरक्षणं च कर्तुं निरन्तरं कार्यं करोति। सभायाः मानप्रतिष्ठां सदैव अक्षुण्णां स्थापयितुं वर्तमानकार्यकारिणी पूर्णतया प्रतिबद्धा अस्ति। सः उक्तवान् यत् सुभाषजोशिनः प्रयत्नैः विधायकस्य उमेशशर्माकाऊस्य च उद्यमेन विद्वत्सभायै भूखण्डः प्राप्तः। अस्य कृते सः उभयोः प्रति कृतज्ञतां प्रकटितवान्। सभायाः संरक्षकः रामलखनगैरोला विदुषां सामाजिकभूमिकां प्रति विचारान् प्रकटयन् उक्तवान् यत् वर्तमानपरिस्थितिषु विदुषां मौनं चिन्ताजनकम् अस्ति। सः उक्तवान् यत् यदा समाजः विविधाभिः वैचारिकाभिः सांस्कृतिकाभिश्च परिस्थितिभिः सम्मुखीभवति तदा विद्वद्भिः स्वभूमिका अधिकसक्रियतया निर्वहणीया। ज्ञानस्य विवेकस्य च माध्यमेन समाजाय समुचितदिशाप्रदानं विदुषां महत्त्वपूर्णं दायित्वम् अस्ति।
कार्यक्रमस्य सञ्चालनं विद्वत्सभायाः महासचिवः आचार्यः अजयडबरालः अकरोत्। समारोहस्य प्रस्तावनाकथनम् राजेश अमोली मुरलीधरसेमवालश्च प्रस्तुतवन्तौ। सभापुरोहितः मन्त्रीप्रसादथपलियालः दीपप्रज्वलनेन स्वस्तिवाचनेन च कार्यक्रमस्य मङ्गलारम्भम् अकरोत्। उत्तराखण्डपुरोहितसमाजः ब्राह्मणमहासभा संस्कृतभारती अखिलगढवाल-महासभा गीताभवनम् इत्यादयः संस्थाः समारोहस्य आयोजनस्य सहभागिनः अभवन्। समारोहस्य अवसरे सभायाः संरक्षकः राजदीपडिमरी, पूर्वाध्यक्षेषु उदयशङ्करभट्टः सन्दीपरतूडी जयप्रकाशगोदियालः विजेन्द्रममगाईं च उपस्थिताः आसन्। दिनेशभट्टः मुकेशपन्तः तथा अन्ये सभासदः अपि समारोहस्य अवसरे सहभागीभूताः। कार्यक्रमस्य सांस्कृतिकपक्षे विशेषरूपेण आकर्षकं कर्तुं सङ्गम- सांस्कृतिक-कलामञ्चस्य पक्षतः विविधाः सांस्कृतिकाः रंगारङ्गाः च कार्यक्रमाः प्रस्तुताः। कलाकारैः उत्तराखण्डस्य लोकपरम्पराणां संस्कृतेः लोकजीवनस्य च विविधाः झलकयः प्रस्तुताः। ताभिः सांस्कृतिक- प्रस्तुतिभिः उपस्थिताः जनाः विशेषरूपेण आकृष्टाः अभवन्। सांस्कृतिकप्रस्तुतीनां माध्यमेन प्रदेशस्य पारम्परिकवैभवस्य संरक्षणस्य सन्देशः अपि प्रदत्तः। समारोहस्य अनन्तरम् उपस्थितैः अतिथिभिः विद्वद्भिश्च उत्तराखण्डस्य पारम्परिकस्य गढभोजनस्य विविधव्यञ्जनानाम् आस्वादः कृतः। अस्मिन् अवसरे गढभोजपरम्परायाः सांस्कृतिक- परम्परायाश्च संरक्षणस्य आवश्यकता विषये अपि विचारविमर्शः कृतः। उत्तराखण्डविद्वत्सभायाः पदाधिकारिषु उपाध्यक्षः आचार्यसत्यप्रसाद-सेमवालः सहसचिवः आचार्यमुरलीधरसेमवालः कोषाध्यक्षः आचार्यआदित्यरामथपलियालः सङ्गठनसांस्कृतिक-सचिवः आचार्यराजेशअमोली प्रवक्ता आचार्यविपिनडोभालः लेखानिरीक्षकः आचार्यदीपक अमोली, परामर्शदाता आचार्य-आशीषखंकरियालः इत्यादयः कार्यकारिण्याः अन्ये सदस्याश्च आयोजनस्य सफलतायै सक्रियां भूमिकां निर्वहन्तः आसन्। समारोहस्य माध्यमेन उत्तराखण्डस्य समृद्धायाः विद्वत्परम्परायाः संवर्धनस्य संस्कृतभाषायाः संरक्षणप्रसारयोः भारतीयज्ञानपरम्परायाः पुनर्स्मरणस्य, प्रदेशस्य सांस्कृतिकवैभवस्य च नवसन्ततये प्रेषणस्य सङ्कल्पः पुनः दृढीकृतः।

# वेदप्रचारसप्ताहस्य अन्तिमदिवसे रूपलेखनप्रतियोगितायाः आयोजनम्

**हिमसंस्कृतवार्ताः- डॉ विमलेश झा, भागलपुरम्**
बिहारराज्यस्य डीएवी पब्लिक- बरारी- भागलपुर-विद्यालयस्य परिसरे वेदप्रचारसप्ताहस्य अन्तिमे दिवसे विशेषप्रार्थनासभायाः आयोजनम् अभवत्। अस्यां सभायां छात्र-छात्राभिः वेदमन्त्राणां सुमधुरं प्रस्तुतिकरणं कृतं, येन सम्पूर्णं विद्यालयपरिसरं मधुरस्वरेण गुंजायमानम् अभवत्।
अस्मिन् अवसरे विद्यालयस्य शिक्षकः सुनीलकुमारमिश्रमहोदयः वेदवाणीम् ऋषीणां वाणीम् इति वर्णयन् सर्वान् वेदाध्ययनाय प्रेरितवान्। सः उक्तवान् यत् संस्कृतभाषा अत्यन्तं वैज्ञानिकभाषा अस्ति। अतः अस्माभिः संस्कृतभाषायाः अध्ययनं मनोयोगेन करणीयम्। संस्कृतभाषायाः वैज्ञानिकता वैश्विकस्तरेऽपि अनेकैः संस्थाभिः स्वीकृता। अवसरेऽस्मिन् विद्यालयस्य शिक्षकः डॉ. विमलेश झा स्वसम्बोधने उक्तवान् यत् अस्माभिः सम्पूर्णस्य वैदिकसाहित्यस्य अध्ययनं करणीयम्। संस्कृतभाषायां रचितानां विविधग्रन्थानां, पुराणानां, श्रीमद्भगवद्गीतायाः, रामायणस्य च अध्ययनद्वारा वयं भारतीयज्ञानपरम्परायाः सम्यक् परिचयं प्राप्तुं शक्नुमः। सः "अवनीतलंपुनरवतीर्णा स्यात्" इति संस्कृतगीतस्य मधुरस्वरेण गायनमपि कृतवान्। तदनन्तरं पञ्चमीतः सप्तमीकक्षापर्यन्तं छात्र- छात्राणां कृते शब्दरूप- धातुरूप- लेखनप्रतियोगितायाः आयोजनम् अभवत्। अस्यां प्रतियोगितायां प्रायः सार्धैकशतछात्राः उत्साहपूर्वकं भागं गृहीतवन्तः। प्रतिभागिभिः संस्कृतभाषायां विविधशब्दानां शब्दरूपाणि, धातूनां धातुरूपाणि शुद्धतया लिखितानि। विद्यार्थिनां व्याकरणज्ञानं सुदृढं भवेत्, संस्कृतभाषायाः शुद्धप्रयोगस्य च अभ्यासः भवेत् एतदर्थं प्रतियोगितायाः आयोजनं कृतम् आसीत्। अध्यक्षीयसम्बोधने विद्यालयस्य प्राचार्यः सह- सहायक क्षेत्रीय- अधिकारी अनिलकुमारमहोदयः उक्तवान् यत् वेदप्रचारसप्ताहस्य माध्यमेन छात्रेषु वैदिकमूल्यानि, वैदिकसभ्यतां, वैदिकमन्त्राणान्, वैदिकविचारधारां प्रति रुचिः उत्पन्नं कर्तुं शक्यते। छात्राः एतादृशैः कार्यक्रमैः भारतीयसंस्कृतेः सभ्यतायाश्च ज्ञानं प्राप्तुं प्रयतन्ते। अतः भारतीयसंस्कृतेः अक्षुण्णतां संरक्षितुं समये समये एतादृशानाम् आयोजनानां आवश्यकता वर्तते। सप्ताहस्य सफलसञ्चालने आशीषकुमारदासः, अभिषेकशर्मा, प्रगति मिश्रा, वसुंधरा कुमारी,मुक्ता वर्मा , डेजी कुमारी, सुजीत कुमार मण्डल इत्यादीनां समस्तशिक्षक-शिक्षिकाणां, शिक्षकेतरकर्मचारिणां च योगदानं प्रशंसनीयम् आसीत्। विविधैः शैक्षणिकैः सांस्कृतिकैः वैदिकैश्च कार्यक्रमैः सम्पन्नः वेदप्रचारसप्ताहः छात्रेषु भारतीयज्ञानपरम्परां, वैदिकसंस्कृतिं, संस्कृतभाषां च प्रति नवीनां प्रेरणां जनयन् सफलतापूर्वकं सम्पन्नः अभवत्।



## सुन्दरवतीमहिलामहाविद्यालये संस्कृतदिवसः समाचरितः

**भागलपुर, २ सितम्बर २०२६।**
**हिमसंस्कृतवार्ताः- डॉ विमलेश झा**

बिहारराज्यस्य भागलपुरनगरस्थितसुन्दरवतीमहिलामहाविद्यालये संस्कृतदिवसस्य आयोजनं हर्षोल्लासेन सम्पन्नम् अभवत्। महाविद्यालयस्य सभागारे आयोजिते कार्यक्रमे वक्तृभिः संस्कृतभाषायाः महत्त्वं प्रतिपादयन्तः नवसन्ततिभिः संस्कृताध्ययनेन सह सम्बद्धं प्रेरितम्। कार्यक्रमस्य अध्यक्षतां महाविद्यालयस्य प्राचार्या प्रो. निशा झामहाशया अकरोत्। सा स्वसम्बोधने अवदत् यत् “संस्कृतं केवलं प्राचीना भाषा नास्ति, अपितु भारतीयज्ञान-विज्ञान-दर्शन-साहित्य-संस्कृतीनां समृद्धपरम्परायाः आधारः अस्ति।” संस्कृतभाषायां अनेके महत्त्वपूर्णाः ग्रन्थाः रचिताः सन्ति। अतः नवसन्ततेः संस्कृतेन सह सम्बद्धीकरणं तथा तस्य महत्त्वस्य प्रचारः अत्यावश्यकः इति सा प्रतिपादितवती। मुख्यातिथिरूपेण तिलकामांझी भागलपुर विश्वविद्यालयस्य अनुशासनाधिकारी(प्राक्टर )डॉ. मुकेश कुमार सिंहः उपस्थितः आसीत्। सः अवदत् यत् संस्कृतभाषा केवलं धार्मिकभाषा एव अस्ति ऐसा धारणा समुचिता नास्ति। संस्कृतभाषायां साहित्यं, व्याकरणम्, दर्शनम्, गणितम्, चिकित्साविज्ञानम्, भूगोलविज्ञानं च इत्यादीनां विविधज्ञानक्षेत्राणां विपुलं योगदानं विद्यते। संस्कृतस्य व्यापकाध्ययनेन समाजे तां प्रति दृष्टिकोणः परिवर्तनीयः इति सः उक्तवान्। कार्यक्रमे विभागाध्यक्षा डॉ. मधु कुमारी अतिथीनां स्वागतं कृतवती। छात्रैःदीपमन्त्रस्य, मधुराष्टकस्य, संस्कृतगीतस्य तथा श्रीमद्भगवद्गीतायाः मनोहराः प्रस्तुतयः कृताः । छात्राः संस्कृतभाषायाः महत्त्वविषये स्वविचारान् अपि प्रस्तुतवन्तः। कार्यक्रमे महाविद्यालयस्य शिक्षकाः, छात्राः च उत्साहपूर्वकं सहभागितां कृतवन्तः। सम्पूर्णः कार्यक्रमः संस्कृतभाषायाः गौरवं, भारतीयज्ञानपरम्परायाः महत्त्वं च प्रकाशयन् प्रेरणादायकः अभवत्।



## हेमवतीनन्दनबहुगुणागढवालकेन्द्रीयविश्वविद्यालयस्य बिडलापरिसरे संस्कृतसप्ताहमहोत्सवस्य द्वितीयदिवसे गरिमामयः कार्यक्रमः सम्पन्नः, सम्पूर्णविश्वेन आदरपूर्वकं भारतीयज्ञानपरम्पराः स्वीकृताः - "डा.शैलपुत्री"

श्रीनगरम् (गढवालः), ०२ सितम्बर २०२६। हेमवतीनन्दनबहुगुणागढवालकेन्द्रीयविश्वविद्यालयस्य संस्कृतविभागेन आयोजितस्य संस्कृत-सप्ताहमहोत्सवस्य द्वितीयदिवसीयः कार्यक्रमः अत्यन्तं भव्यतया गरिमामयवातावरणे च सम्पन्नः।कार्यक्रमस्य प्रारम्भे अतिथीनां पारम्परिकरीत्या स्वागतं कृतम्। ततः बिडलापरिसरस्य संस्कृतविभागाध्यक्षः डा. विश्वेशवाग्मी स्वागतवक्तव्यं प्रदाय सर्वेषाम् अतिथीनां, आचार्याणां छात्राणां च हार्दिकं स्वागतं कृतवान्। सः अवदत् यत् भारतीयज्ञानपरम्परायाः मूलाधारः संस्कृतविद्यायामेव निहितः अस्ति, अतः भारतस्य स्वस्वरूपस्य साक्षात्कारः संस्कृतज्ञानद्वारेणैव सम्भवः। कार्यक्रमस्य मुख्यवक्त्री दर्शनशास्त्रविभागाध्यक्षा डा. कविता भट्टवर्या भारतीयदर्शनस्य संस्कृतसाहित्यस्य च गूढान् अन्तःसम्बन्धान् विषये सारगर्भितं व्याख्यानं दत्त्वा छात्रान् भारतीयज्ञानपरम्परायाः अनुसरणाय प्रेरितवती। तया उक्तं यत् भारतीयज्ञानपरम्पराः अद्य सम्पूर्णविश्वेन आदरपूर्वकं स्वीकृताः सन्ति। समारोहस्य अध्यक्षतां संस्कृतविभागस्य पूर्वविभागाध्यक्षा प्रो. कमला चौहानवर्या अकरोत्। स्वकीयाध्यक्षीयोद्बोधने तया संस्कृतभाषायाः वैश्विकमहत्त्वं, सांस्कृतिकविरासतां तथा आधुनिकपरिप्रेक्ष्ये तस्याः प्रासङ्गिकतां विशदीकृतवती। विशिष्टातिथिरूपेण उपस्थितौ हिन्दीविभागस्य आचार्यः डा. कपिलपंवारः तथा लोककलासंस्कृतिनिष्पादनकेन्द्रस्य आचार्यः डा. महेन्द्रपंवारः छात्राणां नाट्यप्रतिभायाः प्रशंसां कृत्वा भविष्ये उभयविभागयोः संयुक्ततत्त्वावधानेन नाट्यमञ्चनस्य योजनां प्रतिपादितवन्तौ।

### छात्राणां मनोहरा प्रस्तुतिः- "कालिदासस्यविवाहः"

कार्यक्रमस्य मुख्याकर्षणं संस्कृतविभागस्य छात्रैः प्रस्तुतं ‘कालिदासस्य विवाहः’ इति लघुनाटकम् आसीत्। महाकवेः कालिदासस्य जीवनप्रसङ्गाधारितं तन्नाट्यं सजीवतया अभिनीतं, यत् प्रेक्षकैः साधुवादैः करतलध्वनिभिश्च सम्यक् प्रशंसितम्। तदनन्तरं छात्रैः संस्कृतसुभाषितानां सस्वरपाठेन भाषायाः लालित्यं सौन्दर्यं च प्रकटितम्। कार्यक्रमस्य समापनं डा. प्रीतिमहोदया धन्यवादज्ञापनेन अकरोत्। अन्ते सर्वैः ध्येयमन्त्रः शान्तिपाठश्च सामूहिकरूपेण कृतः। सम्पूर्णकार्यक्रमस्य कुशलं प्रभावी च सञ्चालनं डा. बालकृष्णबधानीमहोदयेन कृतम्। अस्मिन् अवसरे विश्वविद्यालयस्य आचार्याः, शोधार्थिनः, बहुसंख्यकाः छात्राश्च उपस्थिताः आसन्।

## आधुनिककृषिप्रौद्योगिक्याः नूतनं सोपानम्, बिहारस्य ४८० स्थलेषु कृषिड्रोनकेन्द्राणि कृषिस्नातकेभ्यः ५० प्रतिशतपर्यन्तम् अनुदानम्- कृषकेभ्यः सुलभा भविष्यति ड्रोनाधारिता कृषिसेवा

**हिमसंस्कृतवार्ताः- राघव नाथ झा, पाटलिपुत्रम्**

बिहारस्य कृषिक्षेत्रे आधुनिकप्रौद्योगिक्याः उपयोगं वर्धयितुं राज्यसर्वकारेण महत्त्वपूर्णः निर्णयः कृतः। चतुर्थकृषि- योजना- अन्तर्गतं वित्तीयवर्षे २०२६-२७ राज्यस्य विभिन्नेषु जनपदेषु ४८० केन्द्राणि स्थापितानि भविष्यन्ति। एतेषां केन्द्राणां माध्यमेन कृषकेभ्यः आवश्यकतानुसारं सुलभतया ड्रोनसेवा उपलब्धा भविष्यति। कृषिमन्त्री विजयकुमारसिन्हः अवदत् यत् कृषिक्षेत्रे आधुनिकप्रौद्योगिक्याः प्रयोगः राज्यसर्वकारस्य प्रमुखप्राथमिकता अस्ति। कृषकाः महत् मूल्यं दत्त्वा स्वयमेव ड्रोनं क्रेतुं न बाध्याः भविष्यन्ति, अपि तु एतेभ्यः केन्द्रेभ्यः आवश्यकतानुसारं सेवां स्वीकर्तुं शक्नुवन्ति। ड्रोनद्वारा कीटनाशकानां, पोषकतत्त्वानाम्, अन्येषां कृषिनिवेशानां च सेचनं शीघ्रतया सम्यक् च कर्तुं शक्यते। प्रत्येकस्य कृषिड्रोन- केन्द्रस्य परियोजनाव्ययः १० लक्षरूप्यकाणि निर्धारितः अस्ति। कृषिस्नातकानाम् आवेदकेभ्यः परियोजनाव्ययस्य ५० प्रतिशतं, अधिकतमं ५ लक्षरूप्यकाणि अनुदानरूपेण प्रदास्यते। गैर-कृषिस्नातकेभ्यः ४० प्रतिशतं, अधिकतमं ४ लक्षरूप्यकाणि अनुदानं दास्यते। ४८० केन्द्राणां स्थापनायै राज्यसर्वकारेण २४ कोटिरूप्यकाणां प्रावधानं कृतम् अस्ति। जनपदानां मध्ये केन्द्राणां लक्ष्यनिर्धारणं तत्रत्येषु प्रखण्डेषु आधारितं भविष्यति। एतेषां केन्द्राणां माध्यमेन विशेषतः लघु-सीमान्तकृषकेभ्यः आधुनिककृषिसेवा सहजतया प्राप्तुं शक्यते। ड्रोनप्रयोगेन समयस्य श्रमस्य च बचतिः भविष्यति तथा अल्पसमये विस्तीर्णक्षेत्रे कृषिकार्यं सम्पादयितुं शक्यते। मन्त्री विजयकुमारसिन्हः अवदत् यत् कृषिड्रोनकेन्द्राणां स्थापनया ग्रामीणयुवकेभ्यः, विशेषतः कृषिस्नातकेभ्यः, स्वरोजगारस्य आयस्य च नूतनाः अवसराः सृज्यन्ते।




# पाण्डुलिपिसंरक्षणात् चलचित्रनगरपर्यन्तम्, बिहारस्य सांस्कृतिकविकासाय महती कार्ययोजना

## एनएसडी-परिसरस्य स्थापनया नाट्यकलायाः प्रोत्साहनम्, ८ लक्षाधिकाः पाण्डुलिपयः संरक्षितज्ञानसम्पदः भविष्यन्ति

**हिमसंस्कृतवार्ताः- राघव नाथ झा, पाटलिपुत्रम्**

बिहारस्य कला-संस्कृतिक्षेत्रे संरक्षणं, संवर्धनं, आधुनिकप्रौद्योगिक्या सह समन्वयः इति त्रयः प्रमुखाः आधाराः कृत्वा राज्यसर्वकारेण महत्त्वपूर्णा कार्ययोजना प्रस्तुतिता। राष्ट्रीयनाट्यविद्यालयस्य (एनएसडी) परिसरस्य स्थापना, चलचित्रनगरस्य निर्माणम्, बिहारकलाग्रामस्य विकासः तथा प्राचीनपाण्डुलिपीनां संरक्षण-डिजिटलीकरणं भावियोजनायाः प्रमुखाः अंशाः सन्ति। कला-संस्कृति- युवकार्यविभागस्य मन्त्री डॉ. प्रमोदकुमारः पाटलिपुत्रे आयोजिते वार्तासम्मेलने विभागस्य उपलब्धीनां भाविकार्यक्रमाणां च विवरणं दत्तवान्। मन्त्री उक्तवान् यत् बिहारस्य कला- सांस्कृतिकपरम्परा अत्यन्तं समृद्धा अस्ति। तस्याः संरक्षणाय राज्यस्य अष्टत्रिंशति जनपदेषु आम्रपाली- प्रशिक्षणकेन्द्राणि स्थाप्यन्ते, यत्र नृत्य- सङ्गीत-वाद्ययन्त्रादिषु विविधासु कलाविधासु प्रशिक्षणं प्रदीयते। एतावत्पर्यन्तं प्रायः त्रिसहस्रं बालकाः प्रशिक्षिताः सन्ति। विभिन्नासु कार्यशालासु अपि सहस्राधिकेभ्यः बालकेभ्यः प्रशिक्षणं प्रदत्तम्। मधुबनीस्थितेन मिथिलाचित्रकलासंस्थानेन सांस्कृतिककार्यक्रमपञ्चाङ्गे राज्यस्य विभिन्नेषु जनपदेषु आयोजिताः प्रायः २४० उत्सवाः महोत्सवाश्च समाविष्टाः सन्ति। मुख्यमंत्री-रामचरितमानसम् आधारीकृत्य निर्मिता १०८ मीटरदीर्घा मिथिलाचित्रकृतिः विश्वविक्रमस्य मान्यतां प्राप्तवती। वर्षे २०२६-२७ तमस्य कलाकार- पेंशन- योजनायाः अन्तर्गतं ४११ कलाकाराः चयनिताः सन्ति।

**पाण्डुलिपयः ज्ञानपरम्परायाः अमूल्यः निधिः-**

ज्ञानभारतम्-अभियानस्य अन्तर्गतं बिहारस्य सर्वेषु ३८ जनपदेषु पाण्डुलिपीनां व्यापकं सर्वेक्षणं सम्पन्नम् अस्ति। सर्वेक्षणे ८ लक्षाधिकाः पाण्डुलिपयः चिह्निताः सन्ति। एताः पाण्डुलिपयः भारतीयज्ञानपरम्परायाः, साहित्यस्य, दर्शनस्य, विज्ञानस्य, सांस्कृतिकस्मृतेः च अमूल्याः निधयः सन्ति। तासां संरक्षणं, डिजिटलीकरणं, भाविपीढीनां कृते सुरक्षितरूपेण उपलब्धीकरणं प्रति विभागेन विशेषं प्राधान्यं दीयते। पाण्डुलिपीनां डिजिटलीकरणाय मेटाडेटा-निर्माणाय च ६.२४ कोटिरूप्यकाणां प्रशासनिकस्वीकृतिः प्रदत्ता अस्ति। अनेन प्राचीनज्ञानसम्पदः संरक्षणं आधुनिक- प्रौद्योगिक्या सह सम्बद्धं भविष्यति।

**चलचित्रक्षेत्रे नूतनाः सम्भावनाः**

बिहारं चलचित्रनिर्माणस्य अनुकूलं केन्द्रं कर्तुं चलचित्र- पोर्टल विकसितम् अस्ति। तत्र ८६२ कलाकाराः, १४८ निर्मातारः, २९ सेवाप्रदातारः च पञ्जीकृताः सन्ति। बिहारचलचित्रप्रोत्साहननीतेः २०२४ अन्तर्गतं ५९ अधिकेभ्यः चलचित्र- वृत्तचित्र- चलचित्रमालिका- परियोजनाभ्यः निर्माणाय अनुमतिः प्रदत्ता अस्ति। चलचित्र- नाट्यक्षेत्रयोः ४७ प्रतिभाशालिभ्यः युवकेभ्यः ३०.४६ लक्षरूप्यकाणां छात्रवृत्तिः प्रदत्ता।

**भव्याः सांस्कृतिकसंरचनाः-**

राज्यस्य सर्वेषु जनपदेषु ६२० दर्शकक्षमतायुक्तानि अटलकलाभवनानि निर्मीयन्ते। सप्तसु जनपदेषु निर्माणकार्यं पूर्णम् अस्ति। वैशाल्यां ५५०.४८ कोटिरूप्यकाणां व्ययेन बुद्धसम्यक्दर्शन-संग्रहालय, सह- स्मृतिस्तूपपरिसरस्य निर्माणं पूर्णम् अस्ति। लखीसरायस्य ऐतिहासिकस्य लालपर्वतस्य संरक्षणाय, पर्यटकीयसुविधानां विकासाय २९.२८ कोटिरूप्यकाणां परियोजना प्रचलति।

**भावियोजनायां एनएसडी, चलचित्रनगरं च-**

विभागस्य भावियोजनायां एनएसडी-परिसरस्य स्थापना, बिहारकलाग्रामस्य निर्माणं, चलचित्रनगरस्य विकासः, चलचित्रमहोत्सवः, चलचित्रसम्मेलनं, भारतीयचलचित्र-टेलिविजनसंस्थया सह कौशलवर्धनकार्यक्रमस्य आयोजनं प्रमुखम् अस्ति। मिथिलाचित्रकलासंस्थाने इन्दिरागान्धी- राष्ट्रीय-कलाकेन्द्रस्य क्षेत्रीयकेन्द्र- स्थापनायाः अपि योजना अस्ति। तदतिरिक्तं भिखारीठाकुरस्य नाम्ना संग्रहालयस्य स्थापना, चिरान्दपुरातत्त्वस्थलस्य विकासः, अन्तर्राष्ट्रीय- बौद्धसम्मेलनस्य आयोजनं, गोलघर- मॉरिसनभवनयोः संरक्षण-जीर्णोद्धारः, पुरातत्त्वभवनस्य निर्माणं, नेपालीमन्दिरस्य, डुमरियास्थित- शिवमन्दिरस्य च संरक्षण- सौन्दर्यवर्धनकार्यं प्रस्तावितम् अस्ति। मन्त्री डॉ. प्रमोदकुमारः अवदत् यत् प्राचीनज्ञानसम्पदः संरक्षणेन, कलाकारप्रतिभानां संवर्धनेन, आधुनिक- सांस्कृतिक- संरचनानां विकासेन बिहारस्य सांस्कृतिकवैभवं नूतनं वैश्विकपरिमाणं प्राप्स्यति। वार्तासम्मेलने विभागीयसचिवः प्रणवकुमारः, सांस्कृतिककार्यनिदेशालयस्य निदेशिका रूबी, संग्रहालयनिदेशालयस्य निदेशकः कृष्णकुमारश्च उपस्थिताः आसन्।

---

# "संस्कृत कथा मञ्जरी"

## ।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।।

## "ब्रह्मचारिराज्यदानं नाम षष्ठोपाख्यानम्"

आदौ ब्रह्मचारी, ततो गृही च भूत्वा प्रव्रजेदिति। तत् विक्रमार्कभूपतय सर्वमात्मवृत्तान्तः विज्ञाप्य, स तव मनोरथं पूरयिष्यति इति। एवं देव्या स्वप्ने भणितम्। अतस्तव समीपमागतोऽस्मि इति। इत्येव कपटवचनैः राजानमुक्तवान्। तच्छ्रुत्वा राजा कूटवाग्व्यापारं सम्यगवगत्य स्वमनसि अचिन्तयत्- असावेवम् अनृतं वदति। अस्तु, तथाऽप्यर्थी वर्त्तते, सर्वथाऽस्य मनोरथः पूरणीयः। उक्तञ्च-

**"दत्त्वाऽऽर्त्ताय नृपो दानं शून्यं लिङ्गं प्रपूज्य च।**
**परिपाल्याऽऽश्रितं नित्यमश्वमेधफलं लभेत्।"**

इति विचार्य्य तत्र नगरमेकं कारयित्वा, तमभिषिच्य च तस्मिन् नगरे संस्थाप्य विलासिनीनां शतम् अदात्। पञ्चाशद्गजान्, तुरङ्गाणां पञ्चशतीं, भटानां चतुःसहस्रीं तस्मै ब्राह्मणाय दत्वा, चण्डिकापुरमिति तस्य नगरस्य नाम कृतम्। ततः परिपूर्णमनोरथो ब्राह्मणस्तं राजानमाशीर्भिरभ्यर्थयामास। अथ राजाऽपि निजनगरमगमत्। इति कथां कथयित्वा पुत्तलिका राजानमब्रवीत्- भो राजन्! त्वयि एवमौदार्य्यं विद्यते चेत्, तर्हि अस्मिन् सिंहासने समुपविश। राजा तूष्णीमासीत्।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे, महाराष्ट्रम्**



## कालगणनायाः वैज्ञानिकदर्पणं पञ्चाङ्गम्, ज्योतिषशास्त्रे विदुषां गहनमन्थनम्

# ललितनारायणमिथिलाविश्वविद्यालये 'ज्योतिषशास्त्रे पञ्चाङ्गविचारः' इति विषये राष्ट्रियसङ्गोष्ठी सम्पन्ना





**हिमसंस्कृतवार्ताः- राघव नाथ झा, दरभङ्गा।** ललितनारायण- मिथिलाविश्वविद्यालयस्य स्नातकोत्तर- संस्कृतविभागस्य, डॉ. प्रभातदास- फाउण्डेशन इत्यस्य च संयुक्ततत्त्वावधाने 'ज्योतिषशास्त्रे पञ्चाङ्गविचारः' इति विषयमधिकृत्य राष्ट्रियसङ्गोष्ठी संस्कृतविभागस्य सभागारे सम्पन्ना। सङ्गोष्ठ्याः अध्यक्षता संस्कृतविभागाध्यक्षः डॉ. कृष्णकान्तझा अकरोत्। सङ्गोष्ठ्याः मुख्यवक्तृरूपेण काशी- हिन्दू- विश्वविद्यालयस्य धर्मागमविभागस्य भूतपूर्वविभागाध्यक्षः डॉ. रामजीवनमिश्रः उपस्थितः आसीत्। सः स्वसम्बोधने अवदत्- "ज्योतिषं साक्षात् कालविधानस्य शास्त्रम् अस्ति, यत् सृष्टेः प्रारम्भात् महाप्रलयपर्यन्तं कालगणनां कर्तुं समर्थम् अस्ति।" सः प्रतिपादितवान् यत् पञ्चाङ्गस्य पञ्च अङ्गानि तिथिः, वारः, नक्षत्रं, योगः, करणं च भारतीयकालगणनायाः प्रमुखाधाराः सन्ति। पञ्चाङ्गं सूर्यचन्द्रयोः गतिचक्रयोः वैज्ञानिकः समन्वयः अस्ति, येन ऋतुपरिवर्तनस्य, सूर्यचन्द्रग्रहणादीनां च खगोलीयघटनानां पूर्वज्ञानं प्राप्तुं शक्यते।
मानविकीसङ्कायस्य अध्यक्षा प्रो. पुनीता झा उद्घाटनसम्बोधने अवदत् यत् सनातनजीवनपद्धतौ ज्योतिषस्य पञ्चाङ्गस्य च विशिष्टं महत्त्वं विद्यते। व्रत- पर्व- महोत्सव- संस्कार- माङ्गलिककार्याणां शुभमुहूर्तनिर्धारणे पञ्चाङ्गस्य महत्त्वपूर्णा भूमिका वर्तते। पञ्चाङ्गं भारतीयपरम्परायाः कालबोधस्य प्रमुखं साधनमस्ति।
सी. एम. बी. महाविद्यालयस्य, घोघरडीहायाः प्राचार्यः प्रो. जीवानन्दझा विशिष्टवक्तृरूपेण अवदत् यत् भारतीयकालगणनापद्धतौ अनेकानि विशिष्टानि तत्त्वानि निहितानि सन्ति। सनातनपरम्परायां निरूपितानां षोडशसंस्काराणां सम्यक् सम्पादनाय पञ्चाङ्गज्ञानं परमावश्यकम् अस्ति। सङ्गोष्ठ्याः बीजवक्तृरूपेण डॉ. आर. एन. चौरसियाः अवदन् यत् आकाशीयपिण्डानां गतिस्थितेः तथा शुभमुहूर्तानां निर्धारणे पञ्चाङ्गस्य महत्त्वपूर्णं स्थानम् अस्ति। पञ्चाङ्गस्य अध्ययनं भारतीयजीवनपद्धतेः प्रकृतेश्च मध्ये सामञ्जस्यं स्थापयितुं सहायकं भवति। अध्यक्षीयसम्बोधने डॉ. कृष्णकान्तझा अवदत्- "ज्योतिषं निखिलशास्त्राणां शिरोमणिः अस्ति। 'ज्योतिषं वेदानां चक्षुः' इति प्राचीनैः मनीषिभिः प्रतिपादितम्।" सः अवदत् यत् भारतीयकालगणना सूर्यचन्द्रयोः गतिम् आधारीकृत्य प्रवर्तते। अतः अस्याः वैज्ञानिकता, प्रमाणिकता, लोकप्रयोजनीयता च अद्यापि महत्त्वपूर्णा वर्तते। कार्यक्रमस्य शुभारम्भः कुमकुमकुमार्याः मङ्गलाचरणेन अभवत्। अतिथीनां स्वागतं मिथिलायाः परम्परानुसारं पाग-वस्त्रेण उत्तरीयप्रदानेन च कृतम्। स्वागतभाषणं डॉ. मोना शर्मा, कृतज्ञताज्ञापनं डॉ. ममता स्नेही, सञ्चालनं च जिग्नेशकुमारेण कृतम्। कार्यक्रमस्य समापनं वैदिकशान्तिमन्त्रपाठेन अभवत्। अस्मिन् अवसरे दर्शनशास्त्रविभागाध्यक्षा डॉ. शिखरवासिनी, फाउण्डेशनस्य सचिवः मुकेशकुमारझा, डॉ. संजीवकुमारशाहः, डॉ. विजयकुमारमिश्रः सहिताः बहवः प्राध्यापकाः, शोधच्छात्राः, छात्राः, कर्मचारिणश्च उपस्थिताः आसन्। सङ्गोष्ठ्यां ज्योतिषशास्त्रस्य, पञ्चाङ्गस्य, भारतीय- काल- गणनायाः च विविधपक्षेषु विद्वद्भिः गहनः सार्थकश्च विमर्शः कृतः।

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतम् व्याहरामि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। अद्य काः विचित्राः वार्ताः श्रुताः त्वया?
**नन्दिनी-** प्रथमा वार्ता बिहारराज्यात् अस्ति। जलोपप्लवेन नद्या केचन विषयुक्ताः मीनाः आनीताः।
**नन्दिनी-** सर्वकारेण जनाः पूर्वसूचिताः यत् ते मीनाः न खाद्येरन्।
**काव्या-** अहो, विषयुक्ताः मीनाः! तच्च भयङ्करम्।
**काव्या-** कानडा-देशे अपि एका आश्चर्यकरी घटना दृष्टा।
**काव्या-** तत्र सरोवरे एकः प्लवमानः द्वीपः प्रादुर्भूतः।
**काव्या-** परन्तु शीघ्रम् एव सः विशालः द्वीपः रहस्यमयरूपेण लुप्तः।
**नन्दिनी-** आश्चर्यम्! द्वीपः कथम् लुप्तः? प्रकृतिः खलु विचित्रा।
**नन्दिनी-** इदानीम् शृणु, अमेरिका-देशे श्वेतश्मश्रुनामकेन एकनवतिवर्षीयेन वृद्धेन एका सुदीर्घा पदयात्रा समाप्ता।
**नन्दिनी-** यात्रायाम् तेन एकसप्तति-वारान् पतनम् अनुभूतम्।
**नन्दिनी-** तथापि तेन स्वलक्ष्यम् प्राप्तम्।
**काव्या-** तस्य वृद्धस्य उत्साहः श्लाघनीयः!
**काव्या-** अन्तिमा वार्ता तन्त्रज्ञान-विषये अस्ति। जर्मन-देशीय-निर्मात्रा एकम् कुरूपम् वस्त्रम् रचितम्।
**काव्या-** यदा तत् वस्त्रम् धार्यते, तदा गुप्तचर-यन्त्राणि वञ्चितानि भवन्ति।
**काव्या-** कृत्रिम-बुद्धि-यन्त्रम् मनुष्यम् न पश्यति!

## माननीयः कुलपतिः डॉ. अतुल वैद्यः दत्तवान् शुभकामनाम्

माननीयः कुलपतिः डॉ. अतुल वैद्यः अवदत् यत् प्रो. पराग जोशी-महोदयस्य आदर्शशिक्षक-राज्यपुरस्कारेण सम्मानितं भवितुं विश्वविद्यालयाय गौरवस्य विषयः अस्ति। सः प्रो. जोशी-महोदयाय शुभकामनाः प्रदाय कामनां कृतवान् यत् भविष्येऽपि तस्मै एवं प्रकारेण अनेकाः सम्मानाः उपलब्धयश्च प्राप्नुयुः। प्रो. पराग जोशी-महोदयेन अयं प्रतिष्ठितपुरस्कारः प्राप्ते सति विश्वविद्यालयस्य कुलसचिवः डॉ. रोशन अलोने, संस्कृत-संस्कृतेतर-संकाययोः अधिष्ठाता प्रो. कविता होले, अन्ये सर्वे अधिष्ठातारः, संवैधानिकाः अधिकारिणः तथा विश्वविद्यालय-परिवारस्य सदस्याः तस्य अभिनन्दनं कृतवन्तः। प्रो. पराग जोशी युवा-विद्यार्थिनां च प्रियः प्राध्यापकः अस्ति तथा संस्कृतकविरूपेण तस्य विशेषा परिचितिः अस्ति। विविधासु भाषासु दक्षतया सह काव्ये, शास्त्रे, वक्तृत्वे, लेखने, वाक्यार्थे, अध्यापने तथा प्रशासने इत्यादिषु विविधक्षेत्रेषु तेन स्वकीयां विशिष्टां परिचितिं निर्मितवती अस्ति।विविधासु भाषासु दक्षतया सह काव्ये, शास्त्रे, वक्तृत्वे, लेखने, वाक्यार्थे, अध्यापने तथा प्रशासने इत्यादिषु विविधक्षेत्रेषु तेन स्वकीयां विशिष्टां परिचितिं निर्मितवती अस्ति।

# आचार्यः पराग जोशी 'डॉ. जे. पी. नाईक आदर्श राज्य शिक्षक' पुरस्कारेण सम्मानितः



महाराष्ट्र-सर्वकारेण अधुना एव डॉ. जे. पी. नाईक आदर्शशिक्षक-राज्यपुरस्काराः घोषिताः सन्ति। वर्षे २०२४-२५ कृते कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयस्य युवा-विद्वान् कविः च संस्कृतभाषा-साहित्य-विभागस्य प्रमुखः प्रो. पराग जोशी डॉ. जे. पी. नाईक आदर्शशिक्षक-राज्यपुरस्काराय चयनितः अस्ति। अयं पुरस्कारः शिक्षाक्षेत्रे विशिष्टयोगदानाय प्रदीयते। संस्कृतक्षेत्रे प्रो. जोशी-महोदयस्य उल्लेखनीययोगदानं दृष्ट्वा तस्य प्रतिष्ठितपुरस्काराय चयनं कृतम् अस्ति। महाराष्ट्र-सर्वकारस्य पक्षतः ५ सितम्बर २०२६दिनाङ्के शिक्षकदिवसस्य अवसरे आयोजिते कार्यक्रमे राज्यस्य माननीयः उच्च-तकनीकी-शिक्षामन्त्री श्री चन्द्रकान्तदादा पाटील इत्यस्य करकमलाभ्यां तस्मै अयं पुरस्कारः प्रदास्यते।